श्रीनिग्रहाचार्यपदस्थश्रीभागवतानन्दगुरुप्रोक्तम्

श्रीनिग्रहेश्वरीसहस्रनामावलिसहितम्

श्रीनिग्रहेश्वरीसहस्रनामस्तोत्रम्

॥ श्रीनिग्रहेश्वरीसहस्रनामस्तोत्रम् ॥

ध्यानम्

श्रीमित्रेश्वरपूजिताब्जचरणां श्रीसिद्धनाथार्चितां
शाक्तान्तर्गतनिग्रहागमनुतां पाखण्डविध्वंसिनीम् ॥
सप्तास्याङ्कितनिग्रहेश्वरहृदि प्राकाम्यसञ्चारिणीं
सिद्धाज्ञाकुलबोधिनीं भगवतीं श्रीनिग्रहेशीं भजे ॥०१ ॥

॥ स्तोत्रम् ॥

अकाराकारसम्भूताकारवाच्याकनिष्ठिका ॥
अकल्काकल्पिताकथ्याकालपूज्याकुतोभया ॥०२ ॥

अगम्याकालजलदोदयाकर्मान्विताकृता ॥
अकारणगुणोत्पन्नगुणाकार्पण्यविग्रहा ॥०३ ॥

अकिल्विषाकुप्यवस्त्राकूपाराकूर्चमानसा ॥
अक्काक्लान्ताक्षमालाक्षसूत्ररूपाक्षपाटका ॥०४ ॥

अक्षुण्णाक्ष्णनियन्त्री चागदङ्कारप्रपूजिता ॥
अगप्रभानलद्योतात्रेयज्योत्स्नाग्निसम्भवा ॥०५ ॥

अग्निमुख्यग्निजिह्वाग्निवल्लभा चाघमर्षणा ॥
अनङ्गाङ्कोलिकानङ्गानङ्गकालाङ्कपालिका ॥०६ ॥

अजपाजाग्रिमाघोराकौटिल्याजाङ्कुराङ्गतिः ॥
अग्रियाच्छिन्नसत्ता चाजराच्छिद्रावधारणा ॥०७ ॥

अजुगुप्सितवृत्तान्तातुल्या चातीवकोपना ॥
अमरानीकसम्मान्यार्तवहीनाञ्जनावती ॥०८ ॥

अथर्वणाप्रतिद्वन्द्वचरित्रापेतराक्षसी ॥
अन्तर्भूतान्नपूर्णाद्रीन्द्रात्मजानूकरक्षिणी ॥०९ ॥

अद्वितीयाद्वैतनिष्ठाद्रिकीलाद्रिपतिप्रिया ॥
अत्रिदृग्जप्रियाधृष्याभ्रमातङ्गेशवल्लभा ॥१० ॥

अब्धिजाब्धिजनेत्राब्दसारसुन्दर्यबन्धना ॥
अभ्यवस्कन्दनरताभिसम्पातविशारदा ॥११ ॥

अमित्रघ्न्यम्बुवाची चापर्णामृततरङ्गिणी ॥
अमर्त्यभुवनाधीशामावस्याब्भक्षमालिनी ॥१२ ॥

अव्याहृतावाप्यवृत्तिरव्याहतपराक्रमा ॥
अव्यक्तावोदहृदयाविस्पष्टस्थितिसंस्थिता ॥१३ ॥

अविमुक्तनिवासाजाश्वाविखङ्गबलिप्रिया ॥
असाधारणयाष्टीकाश्वमेधादिभिरर्चिता ॥१४ ॥

अश्ववक्राष्टकर्णासूर्यम्पश्या चाष्टमातृका ॥
असृक्पासृक्प्रियाहल्याकाशगङ्गागमस्तुता ॥१५ ॥

आखण्डलप्रियाकाङ्क्षाग्नेयी चाङ्गारलोचना ॥
आचार्याचारसंसिद्धाचाराचारविवर्जिता ॥१६ ॥

आजकारस्थिताजानेयारूढातङ्कनाशिनी ॥
आत्मगुप्तापन्नसत्त्वान्वीक्षिकी चामिषप्रिया ॥१७ ॥

आयुष्यसूक्तसम्पूज्यायुष्करी चाम्बिकादितिः ॥
आर्यिकालेख्यशेषारिस्वर्गदायुधधर्मिणी ॥१८ ॥

आशीविषेन्द्रजननी चाशुशुक्षणिरूपिणी ॥
आहवज्ञानकुशलास्तीकमातास्यलाङ्गला ॥१९ ॥

इक्षुहस्तेन्दिरेक्ष्वाकुपूजितेन्दुधरप्रिया ॥
इन्द्रराज्यप्रदेन्द्रादिस्तुतेन्द्रारिविनाशिनी ॥२० ॥

इन्द्रजालकरीन्द्राणीन्द्रनीलमणिसन्निभा ॥
इन्द्रप्रस्थेशवरदा चेन्द्रप्रहरणायुधा ॥२१ ॥

इन्द्रानुजप्रियेन्द्राज्यज्ञानदेन्द्राघनाशिनी ॥
इष्टेष्टापूर्त्तफलदेष्टार्थोद्युक्तेष्मधर्मिणी ॥२२॥

उग्रतारोग्रचण्डोग्रशेखरोग्रोग्रवाहना ॥
उच्छिष्टभोजनोड्डामरेश्वरोक्तमनुस्तुता ॥२३॥

उड्डीशमन्त्रविज्ञानोत्कटोत्तंसविभूषणा ॥
उत्तराशेशवरदोत्तरकोशलरक्षिणी ॥२४॥

उद्बुद्धनयनोद्दीप्तोद्दन्तुरोद्घाटितस्मृतिः ॥
उद्गीथपूजितोदारोषोर्वशी चोरगस्थिता ॥२५॥

ऋक्षराजसुतर्णापनोदनर्तुमती तथा ॥
एकदन्तप्रिया चैकदन्तमातैकपर्णिका ॥२६॥

एकपिङ्गपुराध्यक्षैकसूत्रध्वनिवादिनी ॥
एकानंशैकलिङ्गस्थसाधकेष्टवरप्रदा ॥२७॥

एकायनस्तुतैकैणतिलकाङ्कितशेखरा ॥
ऐश्वर्यदैश्वर्यहरैश्वर्यगर्वापहारिणी ॥२८॥

ओङ्काररूपिणी चोड्रपीठस्थांशुप्रभावती ॥
कंसजिद्वल्लभा कंसघातिनी कंसतर्ज्जनी ॥२९॥

कङ्कालमालिनी कङ्कशायमाता कृशोदरी ॥
काकुत्स्थवन्दिता कञ्चुकालुमस्तकनर्तकी ॥३०॥

कनकप्रसवा कन्दसारवासा कपर्द्दिनी ॥
कान्यकुब्जगता कामशत्रोर्वक्षःस्थलस्थिता ॥३१॥

कदम्बवनमध्यस्था कदम्बकुसुमप्रिया ॥
कन्दराकरशीर्षस्था कपिशाञ्जनगेहिनी ॥३२॥

कपिवक्त्रस्तुता कम्बुग्रीवा कर्णपिशाचिनी ॥
कर्णिकाचलश्रृङ्गस्था कादिविद्याप्रकाशिनी ॥३३॥

कलिन्दनन्दिनी काली कौलिनी कलिवर्द्धिनी ॥
कर्मसंन्यासिकाराध्या कर्ब्बुरी कलिनाशिनी ॥३४॥

कर्व्वा कर्मविपाका च कञ्जोद्यानविहारिणी ॥
कल्माषकण्ठभयदा कल्याणी कनकप्रभा ॥३५॥

कादम्बरी च कान्ताङ्घ्रिदोहदारण्यवासिनी ॥
कान्तारभीतिसन्त्रस्तरक्षिणी कपिरूपिणी ॥३६॥

कापिशेयासनारूढा कापिशेयपतिप्रिया ॥
कामकल्लोलसाम्राज्ञी कामेशी कापिशार्चिता ॥३७॥

कामजानरवा कामकेलिपाण्डित्यविग्रहा ॥
कामरूपमहायोनिपीठस्था कामरूपिणी ॥३८॥

कामावसायिता कामलतालक्ष्या च कामिनी ॥
कामरेखालयाधीशा कामाख्या कामरक्षिणी ॥३९॥

कार्त्तस्वराम्बरा कायस्था कायस्थप्रपूजिता ॥
कार्त्तवीर्यान्तजननी कार्त्तवीर्यकुलाम्बिका ॥४०॥

कार्त्तान्तिका च कारुण्यसिन्धुसम्पूर्णमानसा ॥
कार्त्तिकेयप्रसूः कालकण्ठगात्रनखक्षता ॥४१॥

कीनाशनाशकर्त्री च कीलालपविमर्दिनी ॥
कुटुम्बपोषणासक्ता कुठाटङ्कधरप्रसूः ॥४२॥

कुणिन्दव्यापिनी कुण्ठा कुन्दिनी कुण्टकोदरा ॥
कुण्डपाय्यफलाध्यक्षा कुन्तलीशीरपोषिणी ॥४३॥

कुमारी कुमुदावासा कुब्जिका च कुमोदिनी ॥
कुरुकुल्ला कुम्भयोनिस्तुता कुलकुलायिका ॥४४॥

कुलस्त्री कुलनक्षत्रा कुलवारप्रपूजिता ॥
कुलटा कुलधर्मिष्ठा कुलपर्वतवासिनी ॥४५॥

कुलेशशासना कौलेश्वरी च कुलिशासना ॥
कृकवाकुध्वजक्षेत्रा कुलीना कुलशासना ॥४६॥

कुलका कुञ्जरारातिवाहना कलहप्रिया ॥
कुबेराचलसाम्राज्ञी कुसृतिः कपटेश्वरी ॥४७॥

कुहूकण्ठरवप्रीता कूटस्था कुलिशाङ्कुशा ॥
कूटार्थभाषिता कृत्तिवासोवक्षोविहारिणी ॥४८॥

कृशाङ्गी कूर्मचक्रस्था कृष्कराद्धाङ्गहारिणी ॥
कृपीटयोनिमध्यस्था कृतान्तजननी कृपा ॥४९॥

कृष्णपूज्या कृष्णजाया कृष्णाख्या कृष्णवल्लभा ॥
कृष्णद्वैपायनज्ञानदायिनी कृष्णपिङ्गला ॥५०॥

कृष्णसारथिसम्पूज्या कृष्णसारङ्गरूपिणी ॥
कृष्णाश्रिता कृष्णस्वसा केलिकोपवनाश्रया ॥५१॥

केश्यरिप्रेयसी कृष्णसखी केशिनिसूदना ॥
कैटर्य्यवृक्षहिन्दोला कैटभी कैटभेश्वरी ॥५२॥

कैवर्त्ती कैरवी कोकबन्धुमाता किरातिनी ॥
कोटरा कौशिकारातिवाहनप्रसवा तथा ॥५३॥

कौशीतकी कौशिकी च कौशिकर्षिवरप्रदा ॥
क्रतुद्विड्दैत्यसंहत्री कौस्तुभस्वामिगेहिनी ॥५४॥

क्रौञ्चारातिप्रिया क्रौञ्चभगिनी क्रौञ्चदारणा ॥
क्रोडास्या क्षितिजा क्षिप्रा क्षितिसन्तानचण्डिका ॥५५॥

क्षीरशुक्ला क्षीरसिन्धुसुता क्षेत्राधिदेवता ॥
क्षेमङ्करी च क्षेत्रज्ञा क्षेत्रक्षेत्रज्ञबोधिनी ॥५६॥

खगेन्द्रकेतुरमणी खरारूढा खगासना ॥
खराब्दाङ्कुरकाभा च खरा खट्वाङ्गधारिणी ॥५७॥

खङ्गहस्ता खगास्या च खवास्पालयनन्दिनी ॥
खसात्मजान्तका खष्पा खस्तनी खाण्डवान्तका ॥५८॥

खोङ्काहा खादुका खस्फाटिकास्या खोल्मुकप्रसूः ॥
खेचरी खेचरीमुद्रा ख्यातिः खिङ्खिरविग्रहा ॥५९॥

गगनध्वजनेत्रा च गङ्गा गाङ्गेयपूजिता ॥
गङ्गाधरसुता गङ्गाधरगार्हस्थ्यधर्मिणी ॥६०॥

गजसाह्वयसाम्राज्येश्वरनिर्वाणदायिनी ॥
गजार्यासनसंरूढा गजास्या गजगामिनी ॥६१॥

गणदेवसमाराध्या गणनाथवरप्रदा ॥
गणप्रसूर्गणाद्रीशा गणिका गणनायिका ॥६२॥

गणेशजननी गौरी गदाहस्ता गदान्तका ॥
गतार्त्तवा गणद्रव्या गत्वरा गन्धकालिका ॥६३॥

गरुडाग्रजपद्मस्था गरुडध्वजमोहिनी ॥
गर्भसंरक्षणकरी गर्भिणी गर्भघातिनी ॥६४॥

गायत्री गौतमी गीता गीर्देवी गुणसागरा ॥
गुह्यकाली गुह्यविद्या गुह्ययोनिर्गुहप्रसूः ॥६५॥

गोकुलेशी च गौर्गोपी गोष्ठस्था गोपवल्लभा ॥
गोलोकवासिनी गोला गोलाङ्गूलवरप्रदा ॥६६॥

गोविन्दप्रेयसी ग्राम्या ग्रहकल्लोलभीतिहा ॥
घटोद्भवा घनश्यामा घुष्टा घण्टेश्वरप्रसूः ॥६७॥

घनवल्ली घनज्वाला घनपाखण्डखण्डिनी ॥
चक्रपुष्करिणीक्षेत्रप्रेतमोक्षप्रदायिनी ॥६८॥

चक्राङ्गी चक्रहस्ता च चक्रायुधनमस्कृता ॥
चक्रेश्वरी च चक्रस्था चक्रराजनिवासिनी ॥६९॥

चक्षुष्मती चण्डिका च चञ्चला चण्डनायिका ॥
चामुण्डा रक्तचामुण्डा चण्डमुण्डविनाशिनी ॥७०॥

चक्राधिवासिनी चण्डी चक्रिणी चक्रनायिका ॥
चतुर्दन्तगजारूढा चतुर्वर्गफलप्रदा ॥७१॥

चतुर्विद्या चतुर्वेदा चतुरा च चतुर्गतिः ॥
चन्दनाचलविश्रामा चन्द्रद्वीपाधिदेवता ॥७२॥

चन्द्रकूटाद्रिसंस्थाना चन्द्रिका चन्द्रशेखरा ॥
चन्द्रहासा चन्द्रकला चन्द्रशेखरवल्लभा ॥७३॥

चरणव्यूहविज्ञानबोधिता चरमाचला ॥
चर्च्चिका चर्ममुण्डा च चातुर्मास्यमहोत्सवा ॥७४॥

चातुराश्रम्यमर्यादा चामीकरसमुज्ज्वला ॥
चार्वाकार्हन्तविध्वंसा चित्रा चित्तसमुन्नतिः ॥७५॥

चिन्तामणिश्चित्रलेखा चित्रमेखलवाहना ॥
चित्रकूटनिवासा च चित्रगुप्तवरप्रदा ॥७६॥

छायामृगधरज्योत्स्ना छाया छागबलिप्रिया ॥
जगद्गौरी जगद्धात्री जटाला जगदम्बिका ॥७७॥

जगद्वहा जगद्योनिर्जठरस्था जनाश्रया ॥
जनमेजयसम्पूज्या जननी जनकात्मजा ॥७८॥

जम्भला जह्नुतनया जपयज्ञपरायणा ॥
जमदग्निप्रिया जम्भद्विडाराध्या जयप्रदा ॥७९॥

जरत्कारुर्जरत्कारुप्रिया जातिर्ज्वरापहा ॥
झषोदरी झषाङ्कारिप्रिया टङ्कारनादिनी ॥८०॥

डाकिनी डाकिनीपूज्या तत्त्वज्ञानविधायिनी ॥
तन्तुनागसमारूढा तत्त्वन्यासफलप्रदा ॥८१॥

तन्त्रोपदेशिका तन्त्रमार्गपूज्या तपस्विनी ॥
तन्द्रा तपस्या तन्मात्रा तान्त्रिकी तपनात्मजा ॥८२॥

ताण्डवप्रेयसी तर्कविद्या तापतमस्विनी ॥
तामसी तारिणी तारा त्रिपुरा त्रिपुरान्तका ॥८३॥

तिलपुष्पसमघ्राणा तृप्तिस्त्रिपुरभैरवी ॥
तिलोत्तमा तीक्ष्णदंष्ट्रा तीव्रा तालाङ्कवल्लभा ॥८४॥

तेजस्विनी त्रपारण्डा त्रिकालज्ञा त्रिलोचना ॥
त्रैलोक्यैश्वर्यवरदा त्रिगुणा त्रिदशोद्भवा ॥८५॥

त्रिसन्ध्यव्यापिनी तिस्रपीठाचार्यप्रकाशिनी ॥
त्रिहायणी च त्रैलोक्यविजया त्र्यम्बकानुगा ॥८६॥

त्विषाम्पतिप्रसूर्दक्षकन्या दक्षविनाशिनी ॥
दाक्षायणी दक्षिणाशेश्वरी दक्षिणकालिका ॥८७॥

दक्षिणाचारसन्तुष्टा दक्षिणा दग्धविग्रहा ॥
दण्डनाथा दण्डनीतिर्दण्डनारायणप्रिया ॥८८॥

दधीच्यस्थिस्थिता दध्यानी दैत्यद्विड्वरप्रदा ॥
दमयन्ती च दम्भोलिहस्ता दम्भनिवारणा ॥८९॥

दरिद्रा दर्दुरा दर्दरीकघोषा दशारुहा ॥
देवेशदशनोच्छिष्टा दशग्रीवनिपातिनी ॥९०॥

दशावतारजननी दिग्वस्त्रा चैव दस्रसूः ॥
दाशार्हरमणी दाशनन्दिनी दहनप्रिया ॥९१॥

देवमाता दितिर्देवी देवलोकनिवासिनी ॥
दिवस्पतिप्रिया दिव्या दिव्यवस्त्रा दिगम्बरा ॥९२॥

दुग्धाब्धिजा दिव्यगन्धा च दिष्टान्तविधायिका ॥
दीप्तपिङ्गलसंस्थाना दीप्ता दिव्योपपादुका ॥९३॥

दुरिष्टदमनी दुर्गा दुर्गार्तित्राणकारणा ॥
दुर्जया दुर्जनद्वेषा दुर्वासोवरदायिनी ॥९४॥

दूषणारिप्रिया दृष्टिविक्षेपास्त्रप्रकाशिनी ॥
दुर्लभा दुर्विनीता च दुर्योधनक्षयङ्करी ॥९५॥

देवपत्नी देवसेना देवता देवकात्मजा ॥
दैववाणी च दैवज्ञा देशिका दैवकोविदा ॥९६॥

दोषज्ञा दुष्टसंहारिणी दोर्दण्डपराक्रमा ॥
द्वात्रिंशन्नामसम्पूज्या द्रौपदी द्रविडेश्वरी ॥९७॥

द्वारिकाधीशतनया द्वारिकाधीशगेहिनी ॥
द्वारिकाकुलविध्वंसकारिणी द्वारवासिनी ॥९८॥

दिव्यकार्त्तस्वरागेन्द्रधनुष्कोटिप्रकाशिनी ॥
द्विजराजप्रिया क्षेत्रपालद्वाःस्थितदर्शका ॥९९॥

द्विजेन्द्रवरदा द्वैमातुरक्षेत्रा धरासुता ॥
धरित्री धेनुकाधर्मचारिणी धर्मचारिणी ॥१०० ॥

धर्मचिन्ता धनुर्विद्या धर्मराजजयप्रदा ॥
धूमावती च धिषणा धूम्रलोचनघातिनी ॥१०१ ॥

ध्वान्तसम्मर्दिनी धौतकौशेयी ध्वाङ्क्षवाहना ॥
नक्तञ्चरचमूभक्षा नकुलीशप्रपूजिता ॥१०२ ॥

नक्षत्रमालिनी नक्रघातिनी नखरायुधा ॥
नागाम्बा नागभगिनी नगजा नगनन्दिनी ॥१०३ ॥

नटेश्वरप्रिया नाट्यविद्या नन्दा नटेश्वरी ॥
नन्दिकेश्वरपृष्ठस्था नन्दजा नन्दनन्दिनी ॥१०४ ॥

नभोमण्डलदीपास्या नभोद्वीपसमस्वरा ॥
नरकेष्टा नरकान्तकरी नरकदेवता ॥१०५ ॥

नरनारायणाराध्या नरविष्वणनाशिनी ॥
नरमेधप्रिया नाकनायिका नहुषप्रिया ॥१०६ ॥

नवोद्धृतसुगन्धा च नवरात्रसमर्चिता ॥
नानानुष्ठानसद्रूपा नागारातीशवल्लभा ॥१०७ ॥

नारायणी निराकारा निकषात्मजवैरिणी ॥
निकुम्भिला निग्रहेशी निग्रहेश्वरकामिनी ॥१०८ ॥

निग्रहागमसन्तुष्टा निग्रहागमपूजिता ॥
निःशेषनिग्रहाध्यक्षा निग्रहाज्ञाप्रवर्त्तिनी ॥१०९ ॥

निग्रहाचार्यवरदा निग्रहाचार्यरक्षिणी ॥
निग्रहानुग्रहकरी निग्रही निग्रहेश्वरी ॥११० ॥

निग्रहाचारनिपुणा दुष्टनिग्रहकारिका ॥
निरालम्बा निरम्बा च निर्गुणा निरवग्रहा ॥१११ ॥

निर्विकल्पसमाधिस्था निर्विण्णा निवराकृतिः ॥
निवातकवचत्रासकारिणी च निषद्वरी ॥११२ ॥

निलिम्पनिर्झरी नीतिर्नीतिशास्त्रविशारदा ॥
निशुम्भशुम्भहननी नीलगीर्नीलकुन्तला ॥११३ ॥

नीलाचलनिवासा च नीलमाधवगेहिनी ॥
नीलाब्जवदना नीललोहितेश्वरवल्लभा ॥११४ ॥

नृसिंहरूपिणी न्यक्षघातिनी निगमस्तुता ॥
पञ्चप्रेतासनारूढा पञ्चकृत्यविधायिनी ॥११५ ॥

पञ्चाननसमारूढा पञ्चाननरतिप्रिया ॥
पञ्चाम्नायमहाविद्या पञ्चमाननकृन्तनी ॥११६ ॥

प्रजापतिप्रिया पञ्चाङ्गुलिः पञ्चार्थदायिनी ॥
पञ्चाथर्वशिरोमन्त्रसिद्धिदा प्रियवादिनी ॥११७ ॥

पञ्चकोषस्थिता पञ्चायतनस्था च पञ्चधा ॥
पञ्चरात्रस्तुता पञ्चक्लेशहन्त्री च पण्डिता ॥११८ ॥

प्रकृतिश्च प्लवङ्गेन्द्रमहासैन्यप्रपूजिता ॥
फेत्कारिणी फलाध्यक्षा फलदा फाल्गुनप्रिया ॥११९ ॥

बकजिद्रक्षिणी बल्या बकघ्नी बडवामुखी ॥
बलभद्रप्रिया बाला बगला बलवर्द्धिनी ॥१२० ॥

बलिन्दमशिरच्छेत्री बलारातिजयप्रदा ॥
बाणगङ्गा बाणमाता बाणासुरनिपातिनी ॥१२१ ॥

बाभ्रवी बालसन्ध्या च बलिदानप्रिया बला ॥
बालार्कमण्डलाभासा बिल्ववृक्षनिवासिनी ॥१२२ ॥

ब्रह्मकर्मसमाधिस्था बौद्धपाखण्डखण्डिनी ॥
ब्रह्मज्ञा ब्रह्मरमणी ब्रह्माणी ब्रह्मचारिणी ॥१२३ ॥

ब्रह्मज्ञानप्रदात्री च ब्रह्मदण्डप्रहारिणी ॥
ब्रह्मनिर्वाणरूपा च ब्रह्मराक्षसभीतिहा ॥१२४ ॥

ब्रह्मर्षिपूजिता ब्रह्मविद्या ब्रह्मस्वरूपिणी ॥
ब्रह्मवेदस्तुता ब्रह्मसूत्रा ब्रह्मवरप्रदा ॥१२५ ॥

ब्रह्मास्त्रविद्या ब्रह्मास्त्रस्तम्भिनी ब्रह्मघातिनी ॥
भक्तिर्भगवती भक्तवाञ्छासङ्कल्पपादपा ॥१२६॥

भगीरथसुता भक्तपालिनी भगमालिनी ॥
भण्डासुरनिहन्त्री च भद्रकाली भयप्रदा ॥१२७॥

भद्रा भद्रहरा भद्रप्रदा भद्रेश्वरप्रिया ॥
भद्रात्मजधरा भद्राश्रयसञ्चर्चितस्तनी ॥१२८॥

भरद्वाजस्तुता भव्या भारती भरतप्रसूः ॥
भर्गोयुक्ता भगाकारा भरतप्राणरक्षिणी ॥१२९॥

भवप्रिया भवानी च भवदा भवनाशिनी ॥
भस्मासुरविनाशा च भस्माचलनिवासिनी ॥१३०॥

भार्गवी भार्गवाराध्या भाष्यकारवरप्रदा ॥
भास्करेष्टा भागवतश्लोकचारित्रवर्द्धिनी ॥१३१॥

भूतात्मिका भूतहन्त्री भीमा भीमपराक्रमा ॥
भूतभूमिविहारा च भूतनी भूतनायिका ॥१३२॥

भृङ्गीशार्द्धशरीरस्था भूपुत्री भिल्लसुन्दरी ॥
भेरुण्डा भैरवी भोगावली भैरववल्लभा ॥१३३॥

मकरस्था मगाराध्या मकरध्वजवर्द्धिनी ॥
मङ्गलाङ्गी महामाया माधवी मगधेश्वरी ॥१३४॥

मत्स्योदरी मत्स्यगन्धा मणिद्वीपाधिदेवता ॥
मत्तेभगमना मत्ता मातङ्गी मणिकर्णिका ॥१३५॥

मदना मदनावस्था मदनायुधरूपिणी ॥
मदिराक्षी च मनसा मीनाक्षी मदनोत्सवा ॥१३६॥

मायाविनी मनोगुप्ता मन्त्रजिह्वा मनस्विनी ॥
मन्दाकिनी महाकाली मर्यादा च महोदरी ॥१३७॥

महालक्ष्मीर्महाकालप्रिया मार्त्तण्डभैरवी ॥
महिषघ्नी महापापहरा महिषमर्दिनी ॥१३८॥

मायासीता महाकौलज्ञानदात्री महाशया ॥
माहेश्वरी च माकातारूपिणी मानसालया ॥१३९॥

मूर्द्धाभिषिक्तहर्म्यस्था मुरलीधरमोहिनी ॥
मूलाधारस्थिता मूलप्रकृतिर्मेनकात्मजा ॥१४०॥

महारुद्रप्रिया मेना मैनाकाद्रिसहोदरा ॥
माङ्गल्यदा महारात्रिर्मोहरात्रिश्च मोहिनी ॥१४१॥

यक्षिणी यक्षरात्रिश्च यज्ञनारायणप्रसूः ॥
यज्ञनारायणाराध्या यज्ञनारायणप्रिया ॥१४२॥

यज्ञोपवीतिनी यज्ञपशुस्वर्गसुखप्रदा ॥
यथाशास्त्रसदाचारा यथार्थफलदायिनी ॥१४३॥

यादवेन्द्रकुलाराध्या यादवेन्द्रवरप्रदा ॥
यमी यामवती यामी यमपत्नी यशस्विनी ॥१४४॥

युवती युद्धदक्षा च युधिष्ठिरप्रपूजिता ॥
योनिमुद्रा योगमाया योगनिद्रा च योगिनी ॥१४५॥

योगीश्वरी च योगस्था योगेश्वरनमस्कृता ॥
योगेश्वरी च रक्ताक्षी रक्तबीजाशनी रमा ॥१४६॥

रक्तवस्त्रा रक्तजिह्वा रक्ताङ्गी रक्तदन्तिका ॥
रक्षोघ्नी रक्षिका रक्षोजननी रङ्गनायिका ॥१४७॥

रजताद्रिनिवासा च रजनीचरवल्लभा ॥
रजनीकरदारा च रजनीचरनाशिनी ॥१४८॥

रणालङ्करणप्रेमा रणस्थानविहारिणी ॥
रतार्थिनी रती रण्डा रतिमन्दिरसुन्दरी ॥१४९॥

रत्नपारायणध्वंसकरी रत्नाकरप्रिया ॥
रत्नपारायणावासा रत्नाभरणभूषिता ॥१५०॥

रथक्रान्तागमाराध्या रथाङ्गायुधयोधिनी ॥
रथाङ्गपाणिरमणी रमणी रमणप्रिया ॥१५१॥

रसातलनिवासा च रसज्ञा रविलोचना ॥
रसवारिधिमध्यस्था रासेशी रसिकेश्वरी ॥१५२॥

रसेश्वरी रसास्वादा राक्षसेन्द्रवरप्रदा ॥
राधिका राजलक्ष्मीश्च राक्षसेन्द्रविनाशिनी ॥१५३॥

रामस्तुता राममाता रामचन्द्रजयप्रदा ॥
रामाङ्घ्रिपाविता रामभगिनी रामवल्लभा ॥१५४॥

रामारातिविनाशा च रामदूतवरप्रदा ॥
रामायणकथावक्त्री राघवानन्यरूपिणी ॥१५५॥

रासभस्था रिपुद्रोहा रासमण्डलनायिका ॥
रुक्मिणी रुक्मवर्णा च रुक्मिणीसुतवल्लभा ॥१५६॥

रुद्राक्षमालिनी रुद्रगेहिनी रोगहारिणी ॥
रुद्राणी रुद्रचण्डी च रेणुका रिपुभक्षिणी ॥१५७॥

लक्ष्मीर्लज्जा लोकमाता लोपामुद्रा च लङ्किनी ॥
लाक्षारुणा लोककान्ता ललिता ललितप्रिया ॥१५८॥

लक्ष्मणप्रेयसी लक्ष्यभेदिनी लवणान्तका ॥
लतासाधनसम्पूज्या लोहितस्रवमण्डिता ॥१५९॥

लोकघ्नी लोकजननी वामाचारपरायणा ॥
वाराही वङ्गदेशस्था वज्रिणी वज्रकालिका ॥१६०॥

वज्रज्वाला तथा वज्रवाराही वज्रशृङ्खला ॥
वटपत्राश्रितप्राणविष्णुश्लोकार्द्धदायिनी ॥१६१॥

वनदुर्गा वराङ्गी च वरदा वनमालिनी ॥
वर्णाश्रमविधानज्ञा वर्षिष्ठा वर्णमातृका ॥१६२॥

वह्निप्रिया च वाग्देवी व्यासचिन्तापहारिणी ॥
शङ्खिनी शक्रमाता च शम्बरासुरसूदनी ॥१६३॥

शम्भुप्रिया च शम्बूकघातिनी शशिशेखरा ॥
शिवदूती शिवा शङ्का शाकिनी शिखिवाहना ॥१६४॥

शास्त्रसंरक्षिणी सप्तशतीपूज्या सभोचिता ॥
सती सत्यवती सत्या सम्प्रदायप्रदायिनी ॥१६५॥

कालरात्रिर्महामारी महाविद्या हरप्रिया ॥
मित्रनाथसुहृत्प्रेमा सिद्धनाथवरप्रदा ॥१६६॥

चतुष्पीठाधिगा शक्तिः सिद्धाज्ञापारमेश्वरी ॥
सर्वसिद्धान्तनिष्पन्नमनन्तगुणभूषितम् ॥१६७॥

निग्रहागमसंसिद्धं निग्रहाधीश्वरीप्रियम् ॥
निग्रहाचार्यसम्प्रोक्तं नामसाहस्रकं महत् ॥१६८॥

कामरूपे शतावर्तं कृत्वा सिद्धो भवेन्नरः ॥
यः पठेत्प्रयतो भक्त्या स देव्याः पदवीमियात् ॥१६९॥

॥इति श्रीनिग्रहागमसम्मतं श्रीनिग्रहाचार्यपदस्थेन श्रीभागवतानन्दगुरुणा प्रोक्तं श्रीनिग्रहेश्वरीसहस्रनामस्तोत्रम् ॥

॥ श्रीनिग्रहेश्वरीसहस्रनामावलि ॥

१) ह्रीं अकारायै नमः ॥

२) ह्रीं अकारसम्भूतायै नमः ॥

३) ह्रीं अकारवाच्यायै नमः ॥

४) ह्रीं अकनिष्ठिकायै नमः ॥

५) ह्रीं अकल्कायै नमः ॥

६) ह्रीं अकल्पितायै नमः ॥

७) ह्रीं अकथ्यायै नमः ॥

८) ह्रीं अकालपूज्यायै नमः ॥

९) ह्रीं अकुतोभयायै नमः ॥

१०) ह्रीं अगम्यायै नमः ॥

११) ह्रीं अकालजलदोदयायै नमः ॥

१२) ह्रीं अकर्मान्वितायै नमः ॥

१३) ह्रीं अकृतायै नमः ॥

१४) ह्रीं अकारणगुणोत्पन्नगुणायै नमः ॥

१५) ह्रीं अकार्पण्यविग्रहायै नमः ॥

१६) ह्रीं अकिल्विषायै नमः ॥

१७) ह्रीं अकुप्यवस्त्रायै नमः ॥

१८) ह्रीं अकूपारायै नमः ॥

१९) ह्रीं अकूर्चमानसायै नमः ॥

२०) ह्रीं अक्कायै नमः ॥

२१) ह्रीं अक्लान्तायै नमः ॥

२२) ह्रीं अक्षमालायै नमः ॥

२३) ह्रीं अक्षसूत्ररूपायै नमः ॥

२४) ह्रीं अक्षपाटकायै नमः ॥

२५) ह्रीं अक्षुण्णायै नमः ॥

२६) ह्रीं अक्षणनियन्त्र्यै नमः ॥

२७) ह्रीं अगदङ्कारप्रपूजितायै नमः ॥

२८) ह्रीं अगप्रभायै नमः ॥

२९) ह्रीं अनलद्योतायै नमः ॥

३०) ह्रीं आत्रेयज्योत्स्नायै नमः ॥

३१) ह्रीं अग्निसम्भवायै नमः ॥

३२) ह्रीं अग्निमुख्यै नमः ॥

३३) ह्रीं अग्निजिह्वायै नमः ॥

३४) ह्रीं अग्निवल्लभायै नमः ॥

३५) ह्रीं अघमर्षणायै नमः ॥

३६) ह्रीं अनङ्गाङ्कोलिकायै नमः ॥

३७) ह्रीं अनङ्गायै नमः ॥

३८) ह्रीं अनङ्गकालाङ्कपालिकायै नमः ॥

३९) ह्रीं अजपायै नमः ॥

४०) ह्रीं अजायै नमः ॥

४१) ह्रीं अग्निमायै नमः ॥

४२) ह्रीं अघोरायै नमः ॥

४३) ह्रीं अकौटिल्यायै नमः ॥

४४) ह्रीं अजाङ्कुरायै नमः ॥

४५) ह्रीं अङ्गतये नमः ॥

४६) ह्रीं अग्रियायै नमः ॥

४७) ह्रीं अच्छिन्नसत्तायै नमः ॥

४८) ह्रीं अजरायै नमः ॥

४९) ह्रीं अच्छिद्रावधारणायै नमः ॥

५०) ह्रीं अजुगुप्सितवृत्तान्तायै नमः ॥

५१) ह्रीं अतुल्यायै नमः ॥

५२) ह्रीं अतीवकोपनायै नमः ॥

५३) ह्रीं अमरानीकसम्मान्यायै नमः ॥

५४) ह्रीं आर्त्तवहीनायै नमः ॥

५५) ह्रीं अञ्जनावत्यै नमः ॥

५६) ह्रीं अथर्वणायै नमः ॥

५७) ह्रीं अप्रतिद्वन्द्वचरित्रायै नमः ॥

५८) ह्रीं अपेतराक्षस्यै नमः ॥

५९) ह्रीं अन्तर्भूतायै नमः ॥

६०) ह्रीं अन्नपूर्णायै नमः ॥

६१) ह्रीं अद्रीन्द्रात्मजायै नमः ॥

६२) ह्रीं अनूकरक्षिण्यै नमः ॥

६३) ह्रीं अद्वितीयायै नमः ॥

६४) ह्रीं अद्वैतनिष्ठायै नमः ॥

६५) ह्रीं अद्रिकीलायै नमः ॥

६६) ह्रीं अद्रिपतिप्रियायै नमः ॥

६७) ह्रीं अत्रिद्दप्रप्रियायै नमः ॥

६८) ह्रीं अधृष्यायै नमः ॥

६९) ह्रीं अभ्रमातङ्गेशवल्लभायै नमः ॥

७०) ह्रीं अब्धिजायै नमः ॥

७१) ह्रीं अब्धिजनेत्रायै नमः ॥

७२) ह्रीं अब्दसारसुन्दर्यै नमः ॥

७३) ह्रीं अबन्धनायै नमः ॥

७४) ह्रीं अभ्यवस्कन्दनरतायै नमः ॥

७५) ह्रीं अभिसम्पातविशारदायै नमः ॥

७६) ह्रीं अमित्रघ्न्यै नमः ॥

७७) ह्रीं अम्बुवाच्यै नमः ॥

७८) ह्रीं अपर्णायै नमः ॥

७९) ह्रीं अमृततरङ्गिण्यै नमः ॥

८०) ह्रीं अमर्त्यभुवनाधीशायै नमः ॥

८१) ह्रीं अमावस्यायै नमः ॥

८२) ह्रीं अब्भक्षमालिन्यै नमः ॥

८३) ह्रीं अव्याहृतायै नमः ॥

८४) ह्रीं अवाप्यवृत्तये नमः ॥

८५) ह्रीं अव्याहतपराक्रमायै नमः ॥

८६) ह्रीं अव्यक्तायै नमः ॥

८७) ह्रीं अवोदहृदयायै नमः ॥

८८) ह्रीं अविस्पष्टस्थितिसंस्थितायै नमः ॥

८९) ह्रीं अविमुक्तनिवासायै नमः ॥

९०) ह्रीं अजाश्वाविखड्गबलिप्रियायै नमः ॥

९१) ह्रीं असाधारणयाष्टीकायै नमः ॥

९२) ह्रीं अश्वमेधादिभिरर्चितायै नमः ॥

९३) ह्रीं अश्ववक्त्रायै नमः ॥

९४) ह्रीं अष्टकर्णायै नमः ॥

९५) ह्रीं असूर्यम्पश्यायै नमः ॥

९६) ह्रीं अष्टमातृकायै नमः ॥

९७) ह्रीं असृक्पायै नमः ॥

९८) ह्रीं असृक्प्रियायै नमः ॥

९९) ह्रीं अहल्यायै नमः ॥

१००) ह्रीं आकाशगङ्गायै नमः ॥

१०१) ह्रीं आगमस्तुतायै नमः ॥

१०२) ह्रीं आखण्डलप्रियायै नमः ॥

१०३) ह्रीं आकाङ्क्षायै नमः ॥

१०४) ह्रीं आग्नेय्यै नमः ॥

१०५) ह्रीं आङ्गारलोचनायै नमः ॥

१०६) ह्रीं आचार्यायै नमः ॥

१०७) ह्रीं आचारसंसिद्धायै नमः ॥

१०८) ह्रीं आचारायै नमः ॥

१०९) ह्रीं आचारविवर्जितायै नमः ॥

११०) ह्रीं आजकारस्थितायै नमः ॥

१११) ह्रीं आजानेयारूढायै नमः ॥

११२) ह्रीं आतङ्कनाशिन्यै नमः ॥

११३) ह्रीं आत्मगुप्तायै नमः ॥

११४) ह्रीं आपन्नसत्त्वायै नमः ॥

११५) ह्रीं आन्वीक्षिकीयै नमः ॥

११६) ह्रीं आमिषप्रियायै नमः ॥

११७) ह्रीं आयुष्यसूक्तसम्पूज्यायै नमः ॥

११८) ह्रीं आयुष्कर्यै नमः ॥

११९) ह्रीं अम्बिकायै नमः ॥

१२०) ह्रीं अदित्यै नमः ॥

१२१) ह्रीं आर्यिकायै नमः ॥

१२२) ह्रीं आलेख्यशेषारिस्वर्गदायै नमः ॥

१२३) ह्रीं आयुधधर्मिण्यै नमः ॥

१२४) ह्रीं आशीविषेन्द्रजनन्यै नमः ॥

१२५) ह्रीं आशुशुक्षणिरूपिण्यै नमः ॥

१२६) ह्रीं आहवज्ञानकुशलायै नमः ॥

१२७) ह्रीं आस्तीकमात्रे नमः ॥

१२८) ह्रीं आस्यलाङ्गलायै नमः ॥

१२९) ह्रीं इक्षुहस्तायै नमः ॥

१३०) ह्रीं इन्दिरायै नमः ॥

१३१) ह्रीं इक्ष्वाकुपूजितायै नमः ॥

१३२) ह्रीं इन्दुधरप्रियायै नमः ॥

१३३) ह्रीं इन्द्रराज्यप्रदायै नमः ॥

१३४) ह्रीं इन्द्रादिस्तुतायै नमः ॥

१३५) ह्रीं इन्द्रारिविनाशिन्यै नमः ॥

१३६) ह्रीं इन्द्रजालकर्यै नमः ॥

१३७) ह्रीं इन्द्राण्यै नमः ॥

१३८) ह्रीं इन्द्रनीलमणिसन्निभायै नमः ॥

१३९) ह्रीं इन्द्रप्रस्थेशवरदायै नमः ॥

१४०) ह्रीं इन्द्रप्रहरणायुधायै नमः ॥

१४१) ह्रीं इन्द्रानुजप्रियायै नमः ॥

१४२) ह्रीं इन्द्राज्यज्ञानदायै नमः ॥

१४३) ह्रीं इन्द्राघनाशिन्यै नमः ॥

१४४) ह्रीं इष्टायै नमः ॥

१४५) ह्रीं इष्टापूर्त्तफलदायै नमः ॥

१४६) ह्रीं इष्टार्थोद्युक्तायै नमः ॥

१४७) ह्रीं ईष्मधर्मिण्यै नमः ॥

१४८) ह्रीं उग्रतारायै नमः ॥

१४९) ह्रीं उग्रचण्डायै नमः ॥

१५०) ह्रीं उग्रशेखरायै नमः ॥

१५१) ह्रीं उग्रायै नमः ॥

१५२) ह्रीं उग्रवाहनायै नमः ॥

१५३) ह्रीं उच्छिष्टभोजनायै नमः ॥

१५४) ह्रीं उड्डामरेश्वरोक्तमनुस्तुतायै नमः ॥

१५५) ह्रीं उड्डीशमन्त्रविज्ञानायै नमः ॥

१५६) ह्रीं उत्कटायै नमः ॥

१५७) ह्रीं उत्तंसविभूषणायै नमः ॥

१५८) ह्रीं उत्तराशेशवरदायै नमः ॥

१५९) ह्रीं उत्तरकोशलरक्षिण्यै नमः ॥

१६०) ह्रीं उद्बुद्धनयनायै नमः ॥

१६१) ह्रीं उद्दीप्तायै नमः ॥

१६२) ह्रीं उद्दन्तुरायै नमः ॥

१६३) ह्रीं उद्घाटितस्मृतये नमः ॥

१६४) ह्रीं उद्गीथपूजितायै नमः ॥

१६५) ह्रीं उदारायै नमः ॥

१६६) ह्रीं ऊषायै नमः ॥

१६७) ह्रीं ऊर्वश्यै नमः ॥

१६८) ह्रीं उरगस्थितायै नमः ॥

१६९) ह्रीं ऋक्षराजसुतायै नमः ॥

१७०) ह्रीं ऋणापनोदनायै नमः ॥

१७१) ह्रीं ऋतुमत्यै नमः ॥

१७२) ह्रीं एकदन्तप्रियायै नमः ॥

१७३) ह्रीं एकदन्तमातायै नमः ॥

१७४) ह्रीं एकपर्णिकायै नमः ॥

१७५) ह्रीं एकपिङ्गपुराध्यक्षायै नमः ॥

१७६) ह्रीं एकसूत्रध्वनिवादिन्यै नमः ॥

१७७) ह्रीं एकानंशायै नमः ॥

१७८) ह्रीं एकलिङ्गस्थसाधकेष्टवरप्रदायै नमः ॥

१७९) ह्रीं एकायनस्तुतायै नमः ॥

१८०) ह्रीं एकायै नमः ॥

१८१) ह्रीं एणतिलकाङ्कितशेखरायै नमः ॥

१८२) ह्रीं ऐश्वर्यदायै नमः ॥

१८३) ह्रीं ऐश्वर्यहरायै नमः ॥

१८४) ह्रीं ऐश्वर्यगर्वापहारिण्यै नमः ॥

१८५) ह्रीं ओङ्काररूपिण्यै नमः ॥

१८६) ह्रीं ओड्रपीठस्थायै नमः ॥

१८७) ह्रीं अंशुप्रभावत्यै नमः ॥

१८८) ह्रीं कंसजिद्वल्लभायै नमः ॥

१८९) ह्रीं कंसघातिन्यै नमः ॥

१९०) ह्रीं कंसतर्ज्जन्यै नमः ॥

१९१) ह्रीं कङ्कालमालिन्यै नमः ॥

१९२) ह्रीं कङ्कशायमात्रे नमः ॥

१९३) ह्रीं कृशोदर्यै नमः ॥

१९४) ह्रीं काकुत्स्थवन्दितायै नमः ॥

१९५) ह्रीं कञ्चुकालुमस्तकनर्तक्यै नमः ॥

१९६) ह्रीं कनकप्रसवायै नमः ॥

१९७) ह्रीं कन्दसारवासायै नमः ॥

१९८) ह्रीं कपर्दिन्यै नमः ॥

१९९) ह्रीं कान्यकुब्जगतायै नमः ॥

२००) ह्रीं कामशत्रोर्वक्षःस्थलस्थितायै नमः ॥

२०१) ह्रीं कदम्बवनमध्यस्थायै नमः ॥

२०२) ह्रीं कदम्बकुसुमप्रियायै नमः ॥

२०३) ह्रीं कन्दराकरशीर्षस्थायै नमः ॥

२०४) ह्रीं कपिशाञ्जनगेहिन्यै नमः ॥

२०५) ह्रीं कपिवक्त्रस्तुतायै नमः ॥

२०६) ह्रीं कम्बुग्रीवायै नमः ॥

२०७) ह्रीं कर्णपिशाचिन्यै नमः ॥

२०८) ह्रीं कर्णिकाचलशृङ्गस्थायै नमः ॥

२०९) ह्रीं कादिविद्याप्रकाशिन्यै नमः ॥

२१०) ह्रीं कलिन्दनन्दिन्यै नमः ॥

२११) ह्रीं काल्यै नमः ॥

२१२) ह्रीं कौलिन्यै नमः ॥

२१३) ह्रीं कलिवर्द्धिन्यै नमः ॥

२१४) ह्रीं कर्मसंन्यासिकाराध्यायै नमः ॥

२१५) ह्रीं कर्बुर्यै नमः ॥

२१६) ह्रीं कलिनाशिन्यै नमः ॥

२१७) ह्रीं कर्व्वायै नमः ॥

२१८) ह्रीं कर्मविपाकायै नमः ॥

२१९) ह्रीं कञ्जोद्यानविहारिण्यै नमः ॥

२२०) ह्रीं कल्माषकण्ठभयदायै नमः ॥

२२१) ह्रीं कल्याण्यै नमः ॥

२२२) ह्रीं कनकप्रभायै नमः ॥

२२३) ह्रीं कादम्बर्यै नमः ॥

२२४) ह्रीं कान्ताङ्घ्रिदोहदारण्यवासिन्यै नमः ॥

२२५) ह्रीं कान्तारभीतिसन्त्रस्तरक्षिण्यै नमः ॥

२२६) ह्रीं कपिरूपिण्यै नमः ॥

२२७) ह्रीं कापिशेयासनारूढायै नमः ॥

२२८) ह्रीं कापिशेयपतिप्रियायै नमः ॥

२२९) ह्रीं कामकल्लोलसाम्राज्ञै नमः ॥

२३०) ह्रीं कामेश्यै नमः ॥

२३१) ह्रीं कापिशार्चितायै नमः ॥

२३२) ह्रीं कामजानरवायै नमः ॥

२३३) ह्रीं कामकेलिपाण्डित्यविग्रहायै नमः ॥

२३४) ह्रीं कामरूपमहायोनिपीठस्थायै नमः ॥

२३५) ह्रीं कामरूपिण्यै नमः ॥

२३६) ह्रीं कामावसायितायै नमः ॥

२३७) ह्रीं कामलतालक्ष्यायै नमः ॥

२३८) ह्रीं कामिन्यै नमः ॥

२३९) ह्रीं कामरेखालयाधीशायै नमः ॥

२४०) ह्रीं कामाख्यायै नमः ॥

२४१) ह्रीं कामरक्षिण्यै नमः ॥

२४२) ह्रीं कार्त्तस्वराम्बरायै नमः ॥

२४३) ह्रीं कायस्थायै नमः ॥

२४४) ह्रीं कायस्थप्रपूजितायै नमः ॥

२४५) ह्रीं कार्त्तवीर्यान्तिजनन्यै नमः ॥

२४६) ह्रीं कार्त्तवीर्यकुलाम्बिकायै नमः ॥

२४७) ह्रीं कार्त्तान्तिकायै नमः ॥

२४८) ह्रीं कारुण्यसिन्धुसम्पूर्णमानसायै नमः ॥

२४९) ह्रीं कार्त्तिकेयप्रसुवे नमः ॥

२५०) ह्रीं कालकण्ठगात्रनखक्षतायै नमः ॥

२५१) ह्रीं कीनाशनाशकर्त्रै नमः ॥

२५२) ह्रीं कीलालपविमर्दिन्यै नमः ॥

२५३) ह्रीं कुटुम्बपोषणासक्तायै नमः ॥

२५४) ह्रीं कुठाटङ्कधरप्रसुवे नमः ॥

२५५) ह्रीं कुणिन्दव्यापिन्यै नमः ॥

२५६) ह्रीं कुण्ठायै नमः ॥

२५७) ह्रीं कुन्दिन्यै नमः ॥

२५८) ह्रीं कुण्टकोदरायै नमः ॥

२५९) ह्रीं कुण्डपाय्यफलाध्यक्षायै नमः ॥

२६०) ह्रीं कुन्तलीशीरपोषिण्यै नमः ॥

२६१) ह्रीं कुमार्यै नमः ॥

२६२) ह्रीं कुमुदावासायै नमः ॥

२६३) ह्रीं कुब्जिकायै नमः ॥

२६४) ह्रीं कुमोदिन्यै नमः ॥

२६५) ह्रीं कुरुकुल्लायै नमः ॥

२६६) ह्रीं कुम्भयोनिस्तुतायै नमः ॥

२६७) ह्रीं कुलकुलायिकायै नमः ॥

२६८) ह्रीं कुलस्त्र्यै नमः ॥

२६९) ह्रीं कुलनक्षत्रायै नमः ॥

२७०) ह्रीं कुलवारप्रपूजितायै नमः ॥

२७१) ह्रीं कुलटायै नमः ॥

२७२) ह्रीं कुलधर्मिष्ठायै नमः ॥

२७३) ह्रीं कुलपर्वतवासिन्यै नमः ॥

२७४) ह्रीं कुलेशशासनायै नमः ॥

२७५) ह्रीं कौलेश्वर्यै नमः ॥

२७६) ह्रीं कुलिशासनायै नमः ॥

२७७) ह्रीं कृकवाकुध्वजक्षेत्रायै नमः ॥

२७८) ह्रीं कुलीनायै नमः ॥

२७९) ह्रीं कुलशासनायै नमः ॥

२८०) ह्रीं कुलकायै नमः ॥

२८१) ह्रीं कुञ्जरारातिवाहनायै नमः ॥

२८२) ह्रीं कलहप्रियायै नमः ॥

२८३) ह्रीं कुबेराचलसाम्राज्ञै नमः ॥

२८४) ह्रीं कुसृतये नमः ॥

२८५) ह्रीं कपटेश्वर्यै नमः ॥

२८६) ह्रीं कुहूकण्ठरवप्रीतायै नमः ॥

२८७) ह्रीं कूटस्थायै नमः ॥

२८८) ह्रीं कुलिशाङ्कुशायै नमः ॥

२८९) ह्रीं कूटार्थभाषितायै नमः ॥

२९०) ह्रीं कृत्तिवासोवक्षोविहारिण्यै नमः ॥

२९१) ह्रीं कृशाङ्ग्यै नमः ॥

२९२) ह्रीं कूर्मचक्रस्थायै नमः ॥

२९३) ह्रीं कृष्करार्द्धाङ्गहारिण्यै नमः ॥

२९४) ह्रीं कृपीटयोनिमध्यस्थायै नमः ॥

२९५) ह्रीं कृतान्तजनन्यै नमः ॥

२९६) ह्रीं कृपायै नमः ॥

२९७) ह्रीं कृष्णपूज्यायै नमः ॥

२९८) ह्रीं कृष्णजायायै नमः ॥

२९९) ह्रीं कृष्णाख्यायै नमः ॥

३००) ह्रीं कृष्णवल्लभायै नमः ॥

३०१) ह्रीं कृष्णद्वैपायनज्ञानदायिन्यै नमः ॥

३०२) ह्रीं कृष्णपिङ्गलायै नमः ॥

३०३) ह्रीं कृष्णसारथिसम्पूज्यायै नमः ॥

३०४) ह्रीं कृष्णसारङ्गरूपिण्यै नमः ॥

३०५) ह्रीं कृष्णाश्रितायै नमः ॥

३०६) ह्रीं कृष्णस्वस्रे नमः ॥

३०७) ह्रीं केलिकोपवनाश्रयायै नमः ॥

३०८) ह्रीं केश्यरिप्रेयस्यै नमः ॥

३०९) ह्रीं कृष्णसख्यै नमः ॥

३१०) ह्रीं केशिनिसूदनायै नमः ॥

३११) ह्रीं कैटर्य्यवृक्षहिन्दोलायै नमः ॥

३१२) ह्रीं कैटभ्यै नमः ॥

३१३) ह्रीं कैटभेश्वर्यै नमः ॥

३१४) ह्रीं कैवर्त्यै नमः ॥

३१५) ह्रीं कैरव्यै नमः ॥

३१६) ह्रीं कोकबन्धुमात्रे नमः ॥

३१७) ह्रीं किरातिन्यै नमः ॥

३१८) ह्रीं कोटरायै नमः ॥

३१९) ह्रीं कौशिकारातिवाहनप्रसवायै नमः ॥

३२०) ह्रीं कौशीतक्यै नमः ॥

३२१) ह्रीं कौशिक्यै नमः ॥

३२२) ह्रीं कौशिकर्षिवरप्रदायै नमः ॥

३२३) ह्रीं क्रतुद्विड्दैत्यसंहर्त्र्यै नमः ॥

३२४) ह्रीं कौस्तुभस्वामिगेहिन्यै नमः ॥

३२५) ह्रीं क्रौञ्चारातिप्रियायै नमः ॥

३२६) ह्रीं क्रौञ्चभगिन्यै नमः ॥

३२७) ह्रीं क्रौञ्चदारणायै नमः ॥

३२८) ह्रीं क्रोडास्यायै नमः ॥

३२९) ह्रीं क्षितिजायै नमः ॥

३३०) ह्रीं क्षिप्तायै नमः ॥

३३१) ह्रीं क्षितिसन्तानचण्डिकायै नमः ॥

३३२) ह्रीं क्षीरशुक्लायै नमः ॥

३३३) ह्रीं क्षीरसिन्धुसुतायै नमः ॥

३३४) ह्रीं क्षेत्राधिदेवतायै नमः ॥

३३५) ह्रीं क्षेमङ्कर्यै नमः ॥

३३६) ह्रीं क्षेत्रज्ञायै नमः ॥

३३७) ह्रीं क्षेत्रक्षेत्रज्ञबोधिन्यै नमः ॥

३३८) ह्रीं खगेन्द्रकेतुरमण्यै नमः ॥

३३९) ह्रीं खरारूढायै नमः ॥

३४०) ह्रीं खगासनायै नमः ॥

३४१) ह्रीं खराब्दाङ्कुरकाभायै नमः ॥

३४२) ह्रीं खरायै नमः ॥

३४३) ह्रीं खट्वाङ्गधारिण्यै नमः ॥

३४४) ह्रीं खड्गहस्तायै नमः ॥

३४५) ह्रीं खगास्यायै नमः ॥

३४६) ह्रीं खवास्पालयनन्दिन्यै नमः ॥

३४७) ह्रीं खसात्मजान्तकायै नमः ॥

३४८) ह्रीं खष्पायै नमः ॥

३४९) ह्रीं खस्तन्यै नमः ॥

३५०) ह्रीं खाण्डवान्तकायै नमः ॥

३५१) ह्रीं खोङ्काहायै नमः ॥

३५२) ह्रीं खादुकायै नमः ॥

३५३) ह्रीं खस्फाटिकास्यायै नमः ॥

३५४) ह्रीं खोल्मुकप्रसुवे नमः ॥

३५५) ह्रीं खेचर्यै नमः ॥

३५६) ह्रीं खेचरीमुद्रायै नमः ॥

३५७) ह्रीं ख्यातये नमः ॥

३५८) ह्रीं खिङ्खिरविग्रहायै नमः ॥

३५९) ह्रीं गगनध्वजनेत्रायै नमः ॥

३६०) ह्रीं गङ्गायै नमः ॥

३६१) ह्रीं गाङ्गेयपूजितायै नमः ॥

३६२) ह्रीं गङ्गाधरसुतायै नमः ॥

३६३) ह्रीं गङ्गाधरगार्हस्थ्यधर्मिण्यै नमः ॥

३६४) ह्रीं गजसाह्वयसाम्राज्येश्वरनिर्वाणदायिन्यै नमः ॥

३६५) ह्रीं गजार्यासनसंरूढायै नमः ॥

३६६) ह्रीं गजास्यायै नमः ॥

३६७) ह्रीं गजगामिन्यै नमः ॥

३६८) ह्रीं गणदेवसमाराध्यायै नमः ॥

३६९) ह्रीं गणनाथवरप्रदायै नमः ॥

३७०) ह्रीं गणप्रसुवे नमः ॥

३७१) ह्रीं गणाद्रीशायै नमः ॥

३७२) ह्रीं गणिकायै नमः ॥

३७३) ह्रीं गणनायिकायै नमः ॥

३७४) ह्रीं गणेशजनन्यै नमः ॥

३७५) ह्रीं गौर्यै नमः ॥

३७६) ह्रीं गदाहस्तायै नमः ॥

३७७) ह्रीं गदान्तकायै नमः ॥

३७८) ह्रीं गतार्त्तवायै नमः ॥

३७९) ह्रीं गणद्रव्यायै नमः ॥

३८०) ह्रीं गत्वरायै नमः ॥

३८१) ह्रीं गन्धकालिकायै नमः ॥

३८२) ह्रीं गरुडाग्रजपद्मस्थायै नमः ॥

३८३) ह्रीं गरुडध्वजमोहिन्यै नमः ॥

३८४) ह्रीं गर्भसंरक्षणकर्यै नमः ॥

३८५) ह्रीं गर्भिण्यै नमः ॥

३८६) ह्रीं गर्भघातिन्यै नमः ॥

३८७) ह्रीं गायत्र्यै नमः ॥

३८८) ह्रीं गौतम्यै नमः ॥

३८९) ह्रीं गीतायै नमः ॥

३९०) ह्रीं गीर्देव्यै नमः ॥

३९१) ह्रीं गुणसागरायै नमः ॥

३९२) ह्रीं गुह्यकाल्यै नमः ॥

३९३) ह्रीं गुह्यविद्यायै नमः ॥

३९४) ह्रीं गुह्ययोनये नमः ॥

३९५) ह्रीं गुहप्रसुवे नमः ॥

३९६) ह्रीं गोकुलेश्यै नमः ॥

३९७) ह्रीं गवे नमः ॥

३९८) ह्रीं गोप्यै नमः ॥

३९९) ह्रीं गोष्ठस्थायै नमः ॥

४००) ह्रीं गोपवल्लभायै नमः ॥

४०१) ह्रीं गोलोकवासिन्यै नमः ॥

४०२) ह्रीं गोलायै नमः ॥

४०३) ह्रीं गोलाङ्गूलवरप्रदायै नमः ॥

४०४) ह्रीं गोविन्दप्रेयस्यै नमः ॥

४०५) ह्रीं ग्राम्यायै नमः ॥

४०६) ह्रीं ग्रहकल्लोलभीतिहायै नमः ॥

४०७) ह्रीं घटोद्भवायै नमः ॥

४०८) ह्रीं घनश्यामायै नमः ॥

४०९) ह्रीं घुष्टायै नमः ॥

४१०) ह्रीं घण्टेश्वरप्रसुवे नमः ॥

४११) ह्रीं घनवल्ल्यै नमः ॥

४१२) ह्रीं घनज्वालायै नमः ॥

४१३) ह्रीं घनपाखण्डखण्डिन्यै नमः ॥

४१४) ह्रीं चक्रपुष्करिणीक्षेत्रप्रेतमोक्षप्रदायिन्यै नमः ॥

४१५) ह्रीं चक्राङ्क्यै नमः ॥

४१६) ह्रीं चक्रहस्तायै नमः ॥

४१७) ह्रीं चक्रायुधनमस्कृतायै नमः ॥

४१८) ह्रीं चक्रेश्वर्यै नमः ॥

४१९) ह्रीं चक्रस्थायै नमः ॥

४२०) ह्रीं चक्रराजनिवासिन्यै नमः ॥

४२१) ह्रीं चक्षुष्मत्यै नमः ॥

४२२) ह्रीं चण्डिकायै नमः ॥

४२३) ह्रीं चञ्चलायै नमः ॥

४२४) ह्रीं चण्डनायिकायै नमः ॥

४२५) ह्रीं चामुण्डायै नमः ॥

४२६) ह्रीं रक्तचामुण्डायै नमः ॥

४२७) ह्रीं चण्डमुण्डविनाशिन्यै नमः ॥

४२८) ह्रीं चक्राधिवासिन्यै नमः ॥

४२९) ह्रीं चण्ड्यै नमः ॥

४३०) ह्रीं चक्रिण्यै नमः ॥

४३१) ह्रीं चक्रनायिकायै नमः ॥

४३२) ह्रीं चतुर्दन्तगजारूढायै नमः ॥

४३३) ह्रीं चतुर्वर्गफलप्रदायै नमः ॥

४३४) ह्रीं चतुर्विद्यायै नमः ॥

४३५) ह्रीं चतुर्वेदायै नमः ॥

४३६) ह्रीं चतुरायै नमः ॥

४३७) ह्रीं चतुर्गतये नमः ॥

४३८) ह्रीं चन्दनाचलविश्रामायै नमः ॥

४३९) ह्रीं चन्द्रद्वीपाधिदेवतायै नमः ॥

४४०) ह्रीं चन्द्रकूटाद्रिसंस्थानायै नमः ॥

४४१) ह्रीं चन्द्रिकायै नमः ॥

४४२) ह्रीं चन्द्रशेखरायै नमः ॥

४४३) ह्रीं चन्द्रहासायै नमः ॥

४४४) ह्रीं चन्द्रकलायै नमः ॥

४४५) ह्रीं चन्द्रशेखरवल्लभायै नमः ॥

४४६) ह्रीं चरणव्यूहविज्ञानबोधितायै नमः ॥

४४७) ह्रीं चरमाचलायै नमः ॥

४४८) ह्रीं चर्च्चिकायै नमः ॥

४४९) ह्रीं चर्ममुण्डायै नमः ॥

४५०) ह्रीं चातुर्मास्यमहोत्सवायै नमः ॥

४५१) ह्रीं चातुराश्रम्यमर्यादायै नमः ॥

४५२) ह्रीं चामीकरसमुज्ज्वलायै नमः ॥

४५३) ह्रीं चार्वाकार्हन्तविध्वंसायै नमः ॥

४५४) ह्रीं चित्रायै नमः ॥

४५५) ह्रीं चित्तसमुन्नतये नमः ॥

४५६) ह्रीं चिन्तामणये नमः ॥

४५७) ह्रीं चित्रलेखायै नमः ॥

४५८) ह्रीं चित्रमेखलवाहनायै नमः ॥

४५९) ह्रीं चित्रकूटनिवासायै नमः ॥

४६०) ह्रीं चित्रगुप्तवरप्रदायै नमः ॥

४६१) ह्रीं छायामृगधरज्योत्स्नायै नमः ॥

४६२) ह्रीं छायायै नमः ॥

४६३) ह्रीं छागबलिप्रियायै नमः ॥

४६४) ह्रीं जगद्गौर्यै नमः ॥

४६५) ह्रीं जगद्धात्र्यै नमः ॥

४६६) ह्रीं जटालायै नमः ॥

४६७) ह्रीं जगदम्बिकायै नमः ॥

४६८) ह्रीं जगद्वहायै नमः ॥

४६९) ह्रीं जगद्योन्यै नमः ॥

४७०) ह्रीं जठरस्थायै नमः ॥

४७१) ह्रीं जनाश्रयायै नमः ॥

४७२) ह्रीं जनमेजयसम्पूज्यायै नमः ॥

४७३) ह्रीं जनन्यै नमः ॥

४७४) ह्रीं जनकात्मजायै नमः ॥

४७५) ह्रीं जम्भलायै नमः ॥

४७६) ह्रीं जह्नुतनयायै नमः ॥

४७७) ह्रीं जपयज्ञपरायणायै नमः ॥

४७८) ह्रीं जमदग्निप्रियायै नमः ॥

४७९) ह्रीं जम्भद्विडाराध्यायै नमः ॥

४८०) ह्रीं जयप्रदायै नमः ॥

४८१) ह्रीं जरत्कारवे नमः ॥

४८२) ह्रीं जरत्कारुप्रियायै नमः ॥

४८३) ह्रीं जात्यै नमः ॥

४८४) ह्रीं ज्वरापहायै नमः ॥

४८५) ह्रीं झषोदर्यै नमः ॥

४८६) ह्रीं झषाङ्कारिप्रियायै नमः ॥

४८७) ह्रीं टङ्कारनादिन्यै नमः ॥

४८८) ह्रीं डाकिन्यै नमः ॥

४८९) ह्रीं डाकिनीपूज्यायै नमः ॥

४९०) ह्रीं तत्त्वज्ञानविधायिन्यै नमः ॥

४९१) ह्रीं तन्तुनागसमारूढायै नमः ॥

४९२) ह्रीं तत्त्वन्यासफलप्रदायै नमः ॥

४९३) ह्रीं तन्त्रोपदेशिकायै नमः ॥

४९४) ह्रीं तन्त्रमार्गपूज्यायै नमः ॥

४९५) ह्रीं तपस्विन्यै नमः ॥

४९६) ह्रीं तन्द्रायै नमः ॥

४९७) ह्रीं तपस्यायै नमः ॥

४९८) ह्रीं तन्मात्रायै नमः ॥

४९९) ह्रीं तान्त्रिक्यै नमः ॥

५००) ह्रीं तपनात्मजायै नमः ॥

५०१) ह्रीं ताण्डवप्रेयस्यै नमः ॥

५०२) ह्रीं तर्कविद्यायै नमः ॥

५०३) ह्रीं तापतमस्विन्यै नमः ॥

५०४) ह्रीं तामस्यै नमः ॥

५०५) ह्रीं तारिण्यै नमः ॥

५०६) ह्रीं तारायै नमः ॥

५०७) ह्रीं त्रिपुरायै नमः ॥

५०८) ह्रीं त्रिपुरान्तकायै नमः ॥

५०९) ह्रीं तिलपुष्पसमघ्राणायै नमः ॥

५१०) ह्रीं तृप्त्यै नमः ॥

५११) ह्रीं त्रिपुरभैरव्यै नमः ॥

५१२) ह्रीं तिलोत्तमायै नमः ॥

५१३) ह्रीं तीक्ष्णदंष्ट्रायै नमः ॥

५१४) ह्रीं तीव्रायै नमः ॥

५१५) ह्रीं तालाङ्कवल्लभायै नमः ॥

५१६) ह्रीं तेजस्विन्यै नमः ॥

५१७) ह्रीं त्रपारण्डायै नमः ॥

५१८) ह्रीं त्रिकालज्ञायै नमः ॥

५१९) ह्रीं त्रिलोचनायै नमः ॥

५२०) ह्रीं त्रैलोक्यैश्वर्यवरदायै नमः ॥

५२१) ह्रीं त्रिगुणायै नमः ॥

५२२) ह्रीं त्रिदशोद्भवायै नमः ॥

५२३) ह्रीं त्रिसन्ध्यव्यापिन्यै नमः ॥

५२४) ह्रीं तिस्रपीठाचार्यप्रकाशिन्यै नमः ॥

५२५) ह्रीं त्रिहायण्यै नमः ॥

५२६) ह्रीं त्रैलोक्यविजयायै नमः ॥

५२७) ह्रीं त्र्यम्बकानुगायै नमः ॥

५२८) ह्रीं त्विषाम्पतिप्रसुवे नमः ॥

५२९) ह्रीं दक्षकन्यायै नमः ॥

५३०) ह्रीं दक्षविनाशिन्यै नमः ॥

५३१) ह्रीं दाक्षायण्यै नमः ॥

५३२) ह्रीं दक्षिणाशेश्वर्यै नमः ॥

५३३) ह्रीं दक्षिणकालिकायै नमः ॥

५३४) ह्रीं दक्षिणाचारसन्तुष्टायै नमः ॥

५३५) ह्रीं दक्षिणायै नमः ॥

५३६) ह्रीं दग्धविग्रहायै नमः ॥

५३७) ह्रीं दण्डनाथायै नमः ॥

५३८) ह्रीं दण्डनीत्यै नमः ॥

५३९) ह्रीं दण्डनारायणप्रियायै नमः ॥

५४०) ह्रीं दधीच्यस्थिस्थितायै नमः ॥

५४१) ह्रीं दध्यान्यै नमः ॥

५४२) ह्रीं दैत्यद्विड्वरप्रदायै नमः ॥

५४३) ह्रीं दमयन्त्यै नमः ॥

५४४) ह्रीं दम्भोलिहस्तायै नमः ॥

५४५) ह्रीं दम्भनिवारणायै नमः ॥

५४६) ह्रीं दरिद्रायै नमः ॥

५४७) ह्रीं दर्दुरायै नमः ॥

५४८) ह्रीं दर्दरीकघोषायै नमः ॥

५४९) ह्रीं दशारुहायै नमः ॥

५५०) ह्रीं देवेशदशनोच्छिष्टायै नमः ॥

५५१) ह्रीं दशग्रीवनिपातिन्यै नमः ॥

५५२) ह्रीं दशावतारजनन्यै नमः ॥

५५३) ह्रीं दिग्वस्त्रायै नमः ॥

५५४) ह्रीं दस्रसुवे नमः ॥

५५५) ह्रीं दाशार्हरमण्यै नमः ॥

५५६) ह्रीं दाशनन्दिन्यै नमः ॥

५५७) ह्रीं दहनप्रियायै नमः ॥

५५८) ह्रीं देवमात्रे नमः ॥

५५९) ह्रीं दित्यै नमः ॥

५६०) ह्रीं देव्यै नमः ॥

५६१) ह्रीं देवलोकनिवासिन्यै नमः ॥

५६२) ह्रीं दिवस्पतिप्रियायै नमः ॥

५६३) ह्रीं दिव्यायै नमः ॥

५६४) ह्रीं दिव्यवस्त्रायै नमः ॥

५६५) ह्रीं दिगम्बरायै नमः ॥

५६६) ह्रीं दुग्धाब्धिजायै नमः ॥

५६७) ह्रीं दिव्यगन्धायै नमः ॥

५६८) ह्रीं दिष्टान्तविधायिकायै नमः ॥

५६९) ह्रीं दीप्तपिङ्गलसंस्थानायै नमः ॥

५७०) ह्रीं दीप्तायै नमः ॥

५७१) ह्रीं दिव्योपपादुकायै नमः ॥

५७२) ह्रीं दुरिष्टदमन्यै नमः ॥

५७३) ह्रीं दुर्गायै नमः ॥

५७४) ह्रीं दुर्गार्तित्राणकारणायै नमः ॥

५७५) ह्रीं दुर्जयायै नमः ॥

५७६) ह्रीं दुर्जनद्वेषायै नमः ॥

५७७) ह्रीं दुर्वासोवरदायिन्यै नमः ॥

५७८) ह्रीं दूषणारिप्रियायै नमः ॥

५७९) ह्रीं दृष्टिविक्षेपास्त्रप्रकाशिन्यै नमः ॥

५८०) ह्रीं दुर्लभायै नमः ॥

५८१) ह्रीं दुर्विनीतायै नमः ॥

५८२) ह्रीं दुर्योधनक्षयङ्कर्यै नमः ॥

५८३) ह्रीं देवपत्न्यै नमः ॥

५८४) ह्रीं देवसेनायै नमः ॥

५८५) ह्रीं देवतायै नमः ॥

५८६) ह्रीं देवकात्मजायै नमः ॥

५८७) ह्रीं दैववाण्यै नमः ॥

५८८) ह्रीं दैवज्ञायै नमः ॥

५८९) ह्रीं देशिकायै नमः ॥

५९०) ह्रीं दैवकोविदायै नमः ॥

५९१) ह्रीं दोषज्ञायै नमः ॥

५९२) ह्रीं दुष्टसंहारिण्यै नमः ॥

५९३) ह्रीं दोर्दण्डपराक्रमायै नमः ॥

५९४) ह्रीं द्वात्रिंशन्नामसम्पूज्यायै नमः ॥

५९५) ह्रीं द्रौपद्यै नमः ॥

५९६) ह्रीं द्रविडेश्वर्यै नमः ॥

५९७) ह्रीं द्वारिकाधीशतनयायै नमः ॥

५९८) ह्रीं द्वारिकाधीशगेहिन्यै नमः ॥

५९९) ह्रीं द्वारिकाकुलविध्वंसकारिण्यै नमः ॥

६००) ह्रीं द्वारवासिन्यै नमः ॥

६०१) ह्रीं दिव्यकार्त्तस्वरागेन्द्रधनुष्कोटिप्रकाशिण्यै नमः ॥

६०२) ह्रीं द्विजराजप्रियायै नमः ॥

६०३) ह्रीं क्षेत्रपालद्वाःस्थितदर्शकायै नमः ॥

६०४) ह्रीं द्विजेन्द्रवरदायै नमः ॥

६०५) ह्रीं द्वैमातुरक्षेत्रायै नमः ॥

६०६) ह्रीं धरासुतायै नमः ॥

६०७) ह्रीं धरित्र्यै नमः ॥

६०८) ह्रीं धेनुकाधर्मचारिण्यै नमः ॥

६०९) ह्रीं धर्मचारिण्यै नमः ॥

६१०) ह्रीं धर्मचिन्तायै नमः ॥

६११) ह्रीं धनुर्विद्यायै नमः ॥

६१२) ह्रीं धर्मराजजयप्रदायै नमः ॥

६१३) ह्रीं धूमावत्यै नमः ॥

६१४) ह्रीं धिषणायै नमः ॥

६१५) ह्रीं धूम्रलोचनघातिन्यै नमः ॥

६१६) ह्रीं ध्वान्तसम्मर्दिन्यै नमः ॥

६१७) ह्रीं धौतकौशेय्यै नमः ॥

६१८) ह्रीं ध्वाङ्क्षवाहनायै नमः ॥

६१९) ह्रीं नक्तञ्चरचमूभक्षायै नमः ॥

६२०) ह्रीं नकुलीशप्रपूजितायै नमः ॥

६२१) ह्रीं नक्षत्रमालिन्यै नमः ॥

६२२) ह्रीं नक्रघातिन्यै नमः ॥

६२३) ह्रीं नखरायुधायै नमः ॥

६२४) ह्रीं नागाम्बायै नमः ॥

६२५) ह्रीं नागभगिन्यै नमः ॥

६२६) ह्रीं नगजायै नमः ॥

६२७) ह्रीं नगनन्दिन्यै नमः ॥

६२८) ह्रीं नटेश्वरप्रियायै नमः ॥

६२९) ह्रीं नाट्यविद्यायै नमः ॥

६३०) ह्रीं नन्दायै नमः ॥

६३१) ह्रीं नटेश्वर्यै नमः ॥

६३२) ह्रीं नन्दिकेश्वरपृष्ठस्थायै नमः ॥

६३३) ह्रीं नन्दजायै नमः ॥

६३४) ह्रीं नन्दनन्दिन्यै नमः ॥

६३५) ह्रीं नभोमण्डलदीपास्यायै नमः ॥

६३६) ह्रीं नभोद्वीपसमस्वरायै नमः ॥

६३७) ह्रीं नरकेष्टायै नमः ॥

६३८) ह्रीं नरकान्तकर्यै नमः ॥

६३९) ह्रीं नरकदेवतायै नमः ॥

६४०) ह्रीं नरनारायणाराध्यायै नमः ॥

६४१) ह्रीं नरविष्वणनाशिन्यै नमः ॥

६४२) ह्रीं नरमेधप्रियायै नमः ॥

६४३) ह्रीं नाकनायिकायै नमः ॥

६४४) ह्रीं नहुषप्रियायै नमः ॥

६४५) ह्रीं नवोद्धृतसुगन्धायै नमः ॥

६४६) ह्रीं नवरात्रसमर्चितायै नमः ॥

६४७) ह्रीं नानानुष्ठानसद्रूपायै नमः ॥

६४८) ह्रीं नागारातीशवल्लभायै नमः ॥

६४९) ह्रीं नारायण्यै नमः ॥

६५०) ह्रीं निराकारायै नमः ॥

६५१) ह्रीं निकषात्मजवैरिण्यै नमः ॥

६५२) ह्रीं निकुम्भिलायै नमः ॥

६५३) ह्रीं निग्रहेश्यै नमः ॥

६५४) ह्रीं निग्रहेश्वरकामिन्यै नमः ॥

६५५) ह्रीं निग्रहागमसन्तुष्टायै नमः ॥

६५६) ह्रीं निग्रहागमपूजितायै नमः ॥

६५७) ह्रीं निःशेषनिग्रहाध्यक्षायै नमः ॥

६५८) ह्रीं निग्रहाज्ञाप्रवर्त्तिन्यै नमः ॥

६५९) ह्रीं निग्रहाचार्यवरदायै नमः ॥

६६०) ह्रीं निग्रहाचार्यरक्षिण्यै नमः ॥

६६१) ह्रीं निग्रहानुग्रहकर्यै नमः ॥

६६२) ह्रीं निग्रह्यै नमः ॥

६६३) ह्रीं निग्रहेश्वर्यै नमः ॥

६६४) ह्रीं निग्रहाचारनिपुणायै नमः ॥

६६५) ह्रीं दुष्टनिग्रहकारिकायै नमः ॥

६६६) ह्रीं निरालम्बायै नमः ॥

६६७) ह्रीं निरम्बायै नमः ॥

६६८) ह्रीं निर्गुणायै नमः ॥

६६९) ह्रीं निरवग्रहायै नमः ॥

६७०) ह्रीं निर्विकल्पसमाधिस्थायै नमः ॥

६७१) ह्रीं निर्विण्णायै नमः ॥

६७२) ह्रीं निवराकृत्यै नमः ॥

६७३) ह्रीं निवातकवचत्रासकारिण्यै नमः ॥

६७४) ह्रीं निषद्वर्यै नमः ॥

६७५) ह्रीं निलिम्पनिर्झर्यै नमः ॥

६७६) ह्रीं नीत्यै नमः ॥

६७७) ह्रीं नीतिशास्त्रविशारदायै नमः ॥

६७८) ह्रीं निशुम्भशुम्भहनन्यै नमः ॥

६७९) ह्रीं नीलगिरे नमः ॥

६८०) ह्रीं नीलकुन्तलायै नमः ॥

६८१) ह्रीं नीलाचलनिवासायै नमः ॥

६८२) ह्रीं नीलमाधवगेहिन्यै नमः ॥

६८३) ह्रीं नीलाब्जवदनायै नमः ॥

६८४) ह्रीं नीललोहितेश्वरवल्लभायै नमः ॥

६८५) ह्रीं नृसिंहरूपिण्यै नमः ॥

६८६) ह्रीं न्यक्षघातिन्यै नमः ॥

६८७) ह्रीं निगमस्तुतायै नमः ॥

६८८) ह्रीं पञ्चप्रेतासनारूढायै नमः ॥

६८९) ह्रीं पञ्चकृत्यविधायिन्यै नमः ॥

६९०) ह्रीं पञ्चाननसमारूढायै नमः ॥

६९१) ह्रीं पञ्चाननरतिप्रियायै नमः ॥

६९२) ह्रीं पञ्चाम्नायमहाविद्यायै नमः ॥

६९३) ह्रीं पञ्चमाननकृन्तन्यै नमः ॥

६९४) ह्रीं पञ्चपञ्चेन्द्रियातीतायै नमः ॥

६९५) ह्रीं प्राणसञ्चारकारिण्यै नमः ॥

६९६) ह्रीं पञ्चामरायै नमः ॥

६९७) ह्रीं पञ्चास्यायै नमः ॥

६९८) ह्रीं पञ्चयज्ञफलप्रदायै नमः ॥

६९९) ह्रीं प्रजापतिप्रियायै नमः ॥

७००) ह्रीं पञ्चाङ्गुल्यै नमः ॥

७०१) ह्रीं पञ्चार्थदायिन्यै नमः ॥

७०२) ह्रीं पञ्चाथर्वशिरोमन्त्रसिद्धिदायै नमः ॥

७०३) ह्रीं प्रियवादिन्यै नमः ॥

७०४) ह्रीं पञ्चकोषस्थितायै नमः ॥

७०५) ह्रीं पञ्चायतनस्थायै नमः ॥

७०६) ह्रीं पञ्चधायै नमः ॥

७०७) ह्रीं पञ्चरात्रस्तुतायै नमः ॥

७०८) ह्रीं पञ्चक्लेशहन्त्र्यै नमः ॥

७०९) ह्रीं पण्डितायै नमः ॥

७१०) ह्रीं प्रकृत्यै नमः ॥

७११) ह्रीं प्लवङ्गेन्द्रमहासैन्यप्रपूजितायै नमः ॥

७१२) ह्रीं फेत्कारिण्यै नमः ॥

७१३) ह्रीं फलाध्यक्षायै नमः ॥

७१४) ह्रीं फलदायै नमः ॥

७१५) ह्रीं फाल्गुनप्रियायै नमः ॥

७१६) ह्रीं बकजिद्रक्षिण्यै नमः ॥

७१७) ह्रीं बल्यायै नमः ॥

७१८) ह्रीं बकघ्न्यै नमः ॥

७१९) ह्रीं बडवामुख्यै नमः ॥

७२०) ह्रीं बलभद्रप्रियायै नमः ॥

७२१) ह्रीं बालायै नमः ॥

७२२) ह्रीं बगलायै नमः ॥

७२३) ह्रीं बलवर्द्धिन्यै नमः ॥

७२४) ह्रीं बलिन्दमशिरच्छेत्र्यै नमः ॥

७२५) ह्रीं बलारातिजयप्रदायै नमः ॥

७२६) ह्रीं बाणगङ्गायै नमः ॥

७२७) ह्रीं बाणमात्रे नमः ॥

७२८) ह्रीं बाणासुरनिपातिन्यै नमः ॥

७२९) ह्रीं बाभ्रव्यै नमः ॥

७३०) ह्रीं बालसन्ध्यायै नमः ॥

७३१) ह्रीं बलिदानप्रियायै नमः ॥

७३२) ह्रीं बलायै नमः ॥

७३३) ह्रीं बालार्कमण्डलाभासायै नमः ॥

७३४) ह्रीं बिल्ववृक्षनिवासिन्यै नमः ॥

७३५) ह्रीं ब्रह्मकर्मसमाधिस्थायै नमः ॥

७३६) ह्रीं बौद्धपाखण्डखण्डिन्यै नमः ॥

७३७) ह्रीं ब्रह्मज्ञायै नमः ॥

७३८) ह्रीं ब्रह्मरमण्यै नमः ॥

७३९) ह्रीं ब्रह्माण्यै नमः ॥

७४०) ह्रीं ब्रह्मचारिण्यै नमः ॥

७४१) ह्रीं ब्रह्मज्ञानप्रदात्र्यै नमः ॥

७४२) ह्रीं ब्रह्मदण्डप्रहारिण्यै नमः ॥

७४३) ह्रीं ब्रह्मनिर्वाणरूपायै नमः ॥

७४४) ह्रीं ब्रह्मराक्षसभीतिहायै नमः ॥

७४५) ह्रीं ब्रह्मर्षिपूजितायै नमः ॥

७४६) ह्रीं ब्रह्मविद्यायै नमः ॥

७४७) ह्रीं ब्रह्मस्वरूपिण्यै नमः ॥

७४८) ह्रीं ब्रह्मवेदस्तुतायै नमः ॥

७४९) ह्रीं ब्रह्मसूत्रायै नमः ॥

७५०) ह्रीं ब्रह्मवरप्रदायै नमः ॥

७५१) ह्रीं ब्रह्मास्त्रविद्यायै नमः ॥

७५२) ह्रीं ब्रह्मास्त्रस्तम्भिन्यै नमः ॥

७५३) ह्रीं ब्रह्मघातिन्यै नमः ॥

७५४) ह्रीं भक्त्यै नमः ॥

७५५) ह्रीं भगवत्यै नमः ॥

७५६) ह्रीं भक्तवाञ्छासङ्कल्पपादपायै नमः ॥

७५७) ह्रीं भगीरथसुतायै नमः ॥

७५८) ह्रीं भक्तपालिन्यै नमः ॥

७५९) ह्रीं भगमालिन्यै नमः ॥

७६०) ह्रीं भण्डासुरनिहन्त्र्यै नमः ॥

७६१) ह्रीं भद्रकाल्यै नमः ॥

७६२) ह्रीं भयप्रदायै नमः ॥

७६३) ह्रीं भद्रायै नमः ॥

७६४) ह्रीं भद्रहरायै नमः ॥

७६५) ह्रीं भद्रप्रदायै नमः ॥

७६६) ह्रीं भद्रेश्वरप्रियायै नमः ॥

७६७) ह्रीं भद्रात्मजधरायै नमः ॥

७६८) ह्रीं भद्राश्रयसञ्चर्चितस्तन्यै नमः ॥

७६९) ह्रीं भरद्वाजस्तुतायै नमः ॥

७७०) ह्रीं भव्यायै नमः ॥

७७१) ह्रीं भारत्यै नमः ॥

७७२) ह्रीं भरतप्रसुवे नमः ॥

७७३) ह्रीं भर्गोयुक्तायै नमः ॥

७७४) ह्रीं भगाकारायै नमः ॥

७७५) ह्रीं भरतप्राणरक्षिण्यै नमः ॥

७७६) ह्रीं भवप्रियायै नमः ॥

७७७) ह्रीं भवान्यै नमः ॥

७७८) ह्रीं भवदायै नमः ॥

७७९) ह्रीं भवनाशिन्यै नमः ॥

७८०) ह्रीं भस्मासुरविनाशायै नमः ॥

७८१) ह्रीं भस्माचलनिवासिन्यै नमः ॥

७८२) ह्रीं भार्गव्यै नमः ॥

७८३) ह्रीं भार्गवाराध्यायै नमः ॥

७८४) ह्रीं भाष्यकारवरप्रदायै नमः ॥

७८५) ह्रीं भास्करेष्टायै नमः ॥

७८६) ह्रीं भागवतश्लोकचारित्रवर्द्धिन्यै नमः ॥

७८७) ह्रीं भूतात्मिकायै नमः ॥

७८८) ह्रीं भूतहन्त्र्यै नमः ॥

७८९) ह्रीं भीमायै नमः ॥

७९०) ह्रीं भीमपराक्रमायै नमः ॥

७९१) ह्रीं भूतभूमिविहारायै नमः ॥

७९२) ह्रीं भूतन्यै नमः ॥

७९३) ह्रीं भूतनायिकायै नमः ॥

७९४) ह्रीं भृङ्गीशार्द्धशरीरस्थायै नमः ॥

७९५) ह्रीं भूपुत्र्यै नमः ॥

७९६) ह्रीं भिल्लसुन्दर्यै नमः ॥

७९७) ह्रीं भेरुण्डायै नमः ॥

७९८) ह्रीं भैरव्यै नमः ॥

७९९) ह्रीं भोगावल्यै नमः ॥

८००) ह्रीं भैरववल्लभायै नमः ॥

८०१) ह्रीं मकरस्थायै नमः ॥

८०२) ह्रीं मगाराध्यायै नमः ॥

८०३) ह्रीं मकरध्वजवर्द्धिन्यै नमः ॥

८०४) ह्रीं मङ्गलाङ्ग्यै नमः ॥

८०५) ह्रीं महामायायै नमः ॥

८०६) ह्रीं माधव्यै नमः ॥

८०७) ह्रीं मगधेश्वर्यै नमः ॥

८०८) ह्रीं मत्स्योदर्यै नमः ॥

८०९) ह्रीं मत्स्यगन्धायै नमः ॥

८१०) ह्रीं मणिद्वीपाधिदेवतायै नमः ॥

८११) ह्रीं मत्तेभगमनायै नमः ॥

८१२) ह्रीं मत्तायै नमः ॥

८१३) ह्रीं मातङ्ग्यै नमः ॥

८१४) ह्रीं मणिकर्णिकायै नमः ॥

८१५) ह्रीं मदनायै नमः ॥

८१६) ह्रीं मदनावस्थायै नमः ॥

८१७) ह्रीं मदनायुधरूपिण्यै नमः ॥

८१८) ह्रीं मदिराक्ष्यै नमः ॥

८१९) ह्रीं मनसायै नमः ॥

८२०) ह्रीं मीनाक्ष्यै नमः ॥

८२१) ह्रीं मदनोत्सवायै नमः ॥

८२२) ह्रीं मायाविन्यै नमः ॥

८२३) ह्रीं मनोगुप्तायै नमः ॥

८२४) ह्रीं मन्त्रजिह्वायै नमः ॥

८२५) ह्रीं मनस्विन्यै नमः ॥

८२६) ह्रीं मन्दाकिन्यै नमः ॥

८२७) ह्रीं महाकाल्यै नमः ॥

८२८) ह्रीं मर्यादायै नमः ॥

८२९) ह्रीं महोदर्यै नमः ॥

८३०) ह्रीं महालक्ष्म्यै नमः ॥

८३१) ह्रीं महाकालप्रियायै नमः ॥

८३२) ह्रीं मार्त्तण्डभैरव्यै नमः ॥

८३३) ह्रीं महिषघ्न्यै नमः ॥

८३४) ह्रीं महापापहरायै नमः ॥

८३५) ह्रीं महिषमर्दिन्यै नमः ॥

८३६) ह्रीं मायासीतायै नमः ॥

८३७) ह्रीं महाकौलज्ञानदात्र्यै नमः ॥

८३८) ह्रीं महाशयायै नमः ॥

८३९) ह्रीं माहेश्वर्यै नमः ॥

८४०) ह्रीं माकातारूपिण्यै नमः ॥

८४१) ह्रीं मानसालयायै नमः ॥

८४२) ह्रीं मूर्द्धाभिषिक्तहर्म्यस्थायै नमः ॥

८४३) ह्रीं मुरलीधरमोहिन्यै नमः ॥

८४४) ह्रीं मूलाधारस्थितायै नमः ॥

८४५) ह्रीं मूलप्रकृत्यै नमः ॥

८४६) ह्रीं मेनकात्मजायै नमः ॥

८४७) ह्रीं महारुद्रप्रियायै नमः ॥

८४८) ह्रीं मेनायै नमः ॥

८४९) ह्रीं मैनाकाद्रिसहोदरायै नमः ॥

८५०) ह्रीं माङ्गल्यदायै नमः ॥

८५१) ह्रीं महारात्र्यै नमः ॥

८५२) ह्रीं मोहरात्र्यै नमः ॥

८५३) ह्रीं मोहिन्यै नमः ॥

८५४) ह्रीं यक्षिण्यै नमः ॥

८५५) ह्रीं यक्षरात्र्यै नमः ॥

८५६) ह्रीं यज्ञनारायणप्रसुवे नमः ॥

८५७) ह्रीं यज्ञनारायणाराध्यायै नमः ॥

८५८) ह्रीं यज्ञनारायणप्रियायै नमः ॥

८५९) ह्रीं यज्ञोपवीतिन्यै नमः ॥

८६०) ह्रीं यज्ञपशुस्वर्गसुखप्रदायै नमः ॥

८६१) ह्रीं यथाशास्त्रसदाचारायै नमः ॥

८६२) ह्रीं यथार्थफलदायिन्यै नमः ॥

८६३) ह्रीं यादवेन्द्रकुलाराध्यायै नमः ॥

८६४) ह्रीं यादवेन्द्रवरप्रदायै नमः ॥

८६५) ह्रीं यम्यै नमः ॥

८६६) ह्रीं यामवत्यै नमः ॥

८६७) ह्रीं याम्यै नमः ॥

८६८) ह्रीं यमपत्न्यै नमः ॥

८६९) ह्रीं यशस्विन्यै नमः ॥

८७०) ह्रीं युवत्यै नमः ॥

८७१) ह्रीं युद्धदक्षायै नमः ॥

८७२) ह्रीं युधिष्ठिरप्रपूजितायै नमः ॥

८७३) ह्रीं योनिमुद्रायै नमः ॥

८७४) ह्रीं योगमायायै नमः ॥

८७५) ह्रीं योगनिद्रायै नमः ॥

८७६) ह्रीं योगिन्यै नमः ॥

८७७) ह्रीं योगीश्वर्यै नमः ॥

८७८) ह्रीं योगस्थायै नमः ॥

८७९) ह्रीं योगेश्वरनमस्कृतायै नमः ॥

८८०) ह्रीं योगेश्वर्यै नमः ॥

८८१) ह्रीं रक्ताक्ष्यै नमः ॥

८८२) ह्रीं रक्तबीजाशन्यै नमः ॥

८८३) ह्रीं रमायै नमः ॥

८८४) ह्रीं रक्तवस्त्रायै नमः ॥

८८५) ह्रीं रक्तजिह्वायै नमः ॥

८८६) ह्रीं रक्ताङ्ग्यै नमः ॥

८८७) ह्रीं रक्तदन्तिकायै नमः ॥

८८८) ह्रीं रक्षोघ्न्यै नमः ॥

८८९) ह्रीं रक्षिकायै नमः ॥

८९०) ह्रीं रक्षोजनन्यै नमः ॥

८९१) ह्रीं रङ्गनायिकायै नमः ॥

८९२) ह्रीं रजताद्रिनिवासायै नमः ॥

८९३) ह्रीं रजनीचरवल्लभायै नमः ॥

८९४) ह्रीं रजनीकरदारायै नमः ॥

८९५) ह्रीं रजनीचरनाशिन्यै नमः ॥

८९६) ह्रीं रणालङ्करणप्रेमायै नमः ॥

८९७) ह्रीं रणस्थानविहारिण्यै नमः ॥

८९८) ह्रीं रतार्थिन्यै नमः ॥

८९९) ह्रीं रत्यै नमः ॥

९००) ह्रीं रण्डायै नमः ॥

९०१) ह्रीं रतिमन्दिरसुन्दर्यै नमः ॥

९०२) ह्रीं रत्नपारायणध्वंसकर्यै नमः ॥

९०३) ह्रीं रत्नाकरप्रियायै नमः ॥

९०४) ह्रीं रत्नपारायणावासायै नमः ॥

९०५) ह्रीं रत्नाभरणभूषितायै नमः ॥

९०६) ह्रीं रथक्रान्तागमाराध्यायै नमः ॥

९०७) ह्रीं रथाङ्गायुधयोधिन्यै नमः ॥

९०८) ह्रीं रथाङ्गपाणिरमण्यै नमः ॥

९०९) ह्रीं रमण्यै नमः ॥

९१०) ह्रीं रमणप्रियायै नमः ॥

९११) ह्रीं रसातलनिवासायै नमः ॥

९१२) ह्रीं रसज्ञायै नमः ॥

९१३) ह्रीं रविलोचनायै नमः ॥

९१४) ह्रीं रसवारिधिमध्यस्थायै नमः ॥

९१५) ह्रीं रासेश्यै नमः ॥

९१६) ह्रीं रसिकेश्वर्यै नमः ॥

९१७) ह्रीं रसेश्वर्यै नमः ॥

९१८) ह्रीं रसास्वादायै नमः ॥

९१९) ह्रीं राक्षसेन्द्रवरप्रदायै नमः ॥

९२०) ह्रीं राधिकायै नमः ॥

९२१) ह्रीं राजलक्ष्म्यै नमः ॥

९२२) ह्रीं राक्षसेन्द्रविनाशिन्यै नमः ॥

९२३) ह्रीं रामस्तुतायै नमः ॥

९२४) ह्रीं राममात्रे नमः ॥

९२५) ह्रीं रामचन्द्रजयप्रदायै नमः ॥

९२६) ह्रीं रामाङ्घ्रिपावितायै नमः ॥

९२७) ह्रीं रामभगिन्यै नमः ॥

९२८) ह्रीं रामवल्लभायै नमः ॥

९२९) ह्रीं रामारातिविनाशायै नमः ॥

९३०) ह्रीं रामदूतवरप्रदायै नमः ॥

९३१) ह्रीं रामायणकथावक्त्र्यैनमः ॥

९३२) ह्रीं राघवानन्यरूपिण्यै नमः ॥

९३३) ह्रीं रासभस्थायै नमः ॥

९३४) ह्रीं रिपुद्रोहायै नमः ॥

९३५) ह्रीं रासमण्डलनायिकायै नमः ॥

९३६) ह्रीं रुक्मिण्यै नमः ॥

९३७) ह्रीं रुक्मवर्णायै नमः ॥

९३८) ह्रीं रुक्मिणीसुतवल्लभायै नमः ॥

९३९) ह्रीं रुद्राक्षमालिन्यै नमः ॥

९४०) ह्रीं रुद्रगेहिन्यै नमः ॥

९४१) ह्रीं रोगहारिण्यै नमः ॥

९४२) ह्रीं रुद्राण्यै नमः ॥

९४३) ह्रीं रुद्रचण्ड्यै नमः ॥

९४४) ह्रीं रेणुकायै नमः ॥

९४५) ह्रीं रिपुभक्षिण्यै नमः ॥

९४६) ह्रीं लक्ष्म्यै नमः ॥

९४७) ह्रीं लज्जायै नमः ॥

९४८) ह्रीं लोकमात्रे नमः ॥

९४९) ह्रीं लोपामुद्रायै नमः ॥

९५०) ह्रीं लङ्किन्यै नमः ॥

९५१) ह्रीं लाक्षारुणायै नमः ॥

९५२) ह्रीं लोककान्तायै नमः ॥

९५३) ह्रीं ललितायै नमः ॥

९५४) ह्रीं ललितप्रियायै नमः ॥

९५५) ह्रीं लक्ष्मणप्रेयस्यै नमः ॥

९५६) ह्रीं लक्ष्यभेदिन्यै नमः ॥

९५७) ह्रीं लवणान्तकायै नमः ॥

९५८) ह्रीं लतासाधनसम्पूज्यायै नमः ॥

९५९) ह्रीं लोहितस्रवमण्डितायै नमः ॥

९६०) ह्रीं लोकघ्न्यै नमः ॥

९६१) ह्रीं लोकजनन्यै नमः ॥

९६२) ह्रीं वामाचारपरायणायै नमः ॥

९६३) ह्रीं वाराह्यै नमः ॥

९६४) ह्रीं वङ्गदेशस्थायै नमः ॥

९६५) ह्रीं वज्रिण्यै नमः ॥

९६६) ह्रीं वज्रकालिकायै नमः ॥

९६७) ह्रीं वज्रज्वालायै नमः ॥

९६८) ह्रीं वज्रवाराह्यै नमः ॥

९६९) ह्रीं वज्रश्रृङ्खलायै नमः ॥

९७०) ह्रीं वटपत्राश्रितप्राणविष्णुश्लोकार्द्धदायिन्यै नमः ॥

९७१) ह्रीं वनदुर्गायै नमः ॥

९७२) ह्रीं वराङ्ग्यै नमः ॥

९७३) ह्रीं वरदायै नमः ॥

९७४) ह्रीं वनमालिन्यै नमः ॥

९७५) ह्रीं वर्णाश्रमविधानज्ञायै नमः ॥

९७६) ह्रीं वर्षिष्ठायै नमः ॥

९७७) ह्रीं वर्णमातृकायै नमः ॥

९७८) ह्रीं वह्निप्रियायै नमः ॥

९७९) ह्रीं वाग्देव्यै नमः ॥

९८०) ह्रीं व्यासचिन्तापहारिण्यै नमः ॥

९८१) ह्रीं शङ्खिन्यै नमः ॥

९८२) ह्रीं शक्रमात्रे नमः ॥

९८३) ह्रीं शम्बरासुरसूदन्यै नमः ॥

९८४) ह्रीं शम्भुप्रियायै नमः ॥

९८५) ह्रीं शम्बूकघातिन्यै नमः ॥

९८६) ह्रीं शशिशेखरायै नमः ॥

९८७) ह्रीं शिवदूत्यै नमः ॥

९८८) ह्रीं शिवायै नमः ॥

९८९) ह्रीं शङ्कायै नमः ॥

९९०) ह्रीं शाकिन्यै नमः ॥

९९१) ह्रीं शिखिवाहनायै नमः ॥

९९२) ह्रीं शास्त्रसंरक्षिण्यै नमः ॥

९९३) ह्रीं सप्तशतीपूज्यायै नमः ॥

९९४) ह्रीं सभोचितायै नमः ॥

९९५) ह्रीं सत्यै नमः ॥

९९६) ह्रीं सत्यवत्यै नमः ॥

९९७) ह्रीं सत्यायै नमः ॥

९९८) ह्रीं सम्प्रदायप्रदायिन्यै नमः ॥

९९९) ह्रीं कालरात्र्यै नमः ॥

१०००) ह्रीं महामार्यै नमः ॥

१००१) ह्रीं महाविद्यायै नमः ॥

१००२) ह्रीं हरप्रियायै नमः ॥

१००३) ह्रीं मित्रनाथसुहृत्प्रेमायै नमः ॥

१००४) ह्रीं सिद्धनाथवरप्रदायै नमः ॥

१००५) ह्रीं चतुष्पीठाधिगायै नमः ॥

१००६) ह्रीं शक्त्यै नमः ॥

१००७) ह्रीं सिद्धायै नमः ॥

१००८) ह्रीं आज्ञापारमेश्वर्यै नमः ॥

॥इति श्रीनिग्रहेश्वरीसहस्रनामावलिः ॥